
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ॐ नमो विघ्नराजाय॥ गौरीनवपरिष्वंगे विभोः स्वेदांबु पातु नः॥ नेत्राग्निभीत्या कामेन वारुणास्त्रमिवाहि
तं॥१॥ कैलासे धूर्जटेर्वेश्म्यासुष्यदंतं गणोत्तमं॥ नस्माद्रूररुचीभूता काणभूतिं च भूतले॥२॥ काणभूतेर्गुणा
ढ्यं च गुणाढ्यात्सातवाहनं॥ यत्प्राप्तं शृणुतेदं तद्विद्याधरकथाद्भुतं॥३॥ अस्तिवर्षेदूतिख्यातो देशो दर्पोपशांत
ये॥ स्वर्गस्य निर्मितो धात्रा प्रतिमल्लइव क्षितौ॥४॥ कौशांबी नाम तत्रास्ति मध्यभागे महापुरी॥ लक्ष्मीनिवास
वसतिर्भूतलस्येव कर्णिका॥५॥ तस्यां राजा शतानीकः पांडवान्वयसंभवः॥ जनमेजयपुत्रोभूत्सोत्रो राज्ञः परी
क्षितः॥६॥ अभिमन्युप्रपौत्रस्य यस्यादिः पुरुषोर्जुनः॥ त्रिपुरारिभुजस्तंभदृष्टदोर्दंडविक्रमः॥७॥ कलत्रं
भूरभूत्तस्य राज्ञी विष्णुमती तथा॥ एका रत्नानि सुषुवे न तावदपरा सुतं॥८॥ एकदा मृगयासंगाद्भ्राम्यतश्चा
स्य भूपतेः॥ अभूच्छांडिल्यमुनि**ना समं परिचयो वने॥९॥ सोस्य पुत्रार्थिनो राज्ञः कौशांबीमेत्य साधितं॥ मं
त्रपूतं चरुं राज्ञीं प्राशयन्मुनिसत्तमः॥१०॥ ततस्तस्य सुतो जज्ञे सहस्रानीकसंज्ञकः॥ शुशुभे स पिता येन वि
नयेन गुणो यथा॥११॥ युवराजं क्रमात्कृत्वा शतानीकोथ तं सुतं॥ सम्भोगैरेव राजाभूत्तनु भूभारचिंतनैः॥१२॥
अथासुरैः समं युद्धे प्राप्ते साहाय्यकेच्छया॥ दूतस्तस्मै विसृष्टोभूद्राज्ञे शक्रेण मातलिः॥१३॥ ततो यौगंधराख्य

स्य हस्ते धुर्य्यस्य मंत्रिणः॥ सुप्रतीकाभिधानस्य मुख्यसेनापतेश्च सः॥१४॥ समर्प्य पुत्रं राज्यं च निहंतुमसुरा
न् रणे॥ शक्रांतिकं शतानीकः सह मातलिना ययौ॥१५॥ असुरान् यमदंष्ट्रादीन् बहून् पश्यति वासवे॥ हत्वा नत्रैव
संग्रामे प्राप मृत्युं स भूपतिः॥१६॥ मातल्यानीतदेहं च देवी तं नृपमन्वगात्॥ राज्यलक्ष्मीश्च तत्सुतं सहस्रानीक
माश्रयत्॥१७॥ चित्रं तस्मिन्समारूढे पैत्र्यं सिंहासनं नृपे॥ भरेणा सर्वतो राज्ञां शिरांसि नतिमाययुः॥१८॥ ततः शक्रः
सुहृत्सुतं विपक्षविजयोत्सवे॥ स्वर्गं सहस्रानीकं तं निनाय प्रेष्य मातलिं॥१९॥ स तत्र नंदने देवाक्रीडं नः का न
मिनी सखान्॥ दृष्ट्वा स्वानुचितभार्यार्थी राजा शोकमिवाविशत्॥२०॥ विज्ञाय तमभिप्रायं प्रसुवाचाथ वासवः॥
राजन्नलं विषादेन वांछेयं न वसेत्स्यति॥२१॥ उत्पन्ना हि क्षितौ भार्या तुल्या ते पूर्वनिर्मिता॥ इमं मे शृणु वृत्तां
तं सर्वं ते वर्णयाम्यहं॥२२॥ पुरा पितामहं द्रष्टुमागच्छं तत्सभामहं॥ विधूमो नाम पश्चाच्च ममैको वसुरागम
त्॥२३॥ स्थितेस्मिन्नग्मुस्तत्रैव विरिंचिं द्रष्टुमप्सराः॥ अगादलंबुषा नाम वातविस्रंसितांशुका॥२४॥ तां दृष्ट्वा
व सकामस्य वस्त्रांतं सुरूपागमत्॥ साप्यप्सरांग्नरिसास्तद्रूपाकृष्टलोचना॥२५॥ तदालोक्य ममापन्नपन्मुखं कम
लसंभवः॥ अभिप्रायं विदित्वास्य तावहं शप्तवान्रुषा॥२६॥ मर्त्यलोकेवतारोस्तु युवयोरविनीतयोः॥ भ

बृह०

१

विष्यथश्च तन्नैव युद्धां भार्योपनीइति ॥२७॥ स वसुस्त्वं समुत्पन्नः सहस्रानीक भूपते ॥२॥ शतानीकस्य तन
यो भूषणं शशिनः कुले ॥२८॥ साप्यप्सरा अयोध्यायां कृतवर्मनृपात्मजा ॥ जाता मृगावती नाम्ना सा ते
भार्या भविष्यति ॥२९॥ इतीन्द्रवाक्यं पर्यन्ते रूढं ते हृदि भूपते: ॥ सस्नेहेन तस्य रूगिनि श्राज्वलन्मदनोल्लये ॥ न
॥३०॥ इति संमान्य शक्रेण प्रेषितस्तद्रथेन सः ॥ सहमातलिना राजा प्रतस्थे स्वपुरीं प्रति ॥३१॥ गच्छंतं
चाप्सराः प्रीसा तमुवाच तिलोत्तमा ॥ राजन्नपेक्ष्यामि ते किंचित्तं तीक्ष्णस्व मना गिति ॥३२॥ तदश्रुत्वैव हि
ययौ स तां ध्यायन्मृगावती ॥ ततः साल्लज्जिताकोपात्तं शशाप तिलोत्तमा ॥३३॥ यया हृतमना राजन्न
श्रणोति वचो मम ॥ तया च तु दशसमा वियोगस्ते भविष्यति ॥३४॥ मातलिस्तच्च सुश्राव स च राजा प्रि
योत्सुकः ॥ ययौ रथेन कौशांबीं मयो ध्यां मनसा पुनः ॥३५॥ ततो योगंधरादिभ्यो मंत्रिभ्यो वासवाच्छ्रुतं ॥
मृगावतीगतं सर्वं सशंशोत्सुकया गिरा ॥३६॥ याचितुं तां च कन्यां स नसितुः कृतवर्मणः ॥ अयोध्यां प्र १
हिणोद्दूतं कालक्षेपासहो नृपः ॥३७॥ कृतवर्मा च तद्दूताच्छ्रुत्वा संदेशमभ्यधात् ॥ हर्षद्विव्येकलावसे
ततः साप्येनमभ्यधात् ॥३८॥ राजन्सहस्रानीकाय देयावश्यं मृगावती ॥ इममर्थं च मे स्वप्ने जाने कोप्यव

दद्विजः॥३९॥ अस्य दृष्ट्वा मृगावत्यान्त संगीतादिकौशलं॥ रूपं चाप्रतिमं तस्मै दूतायादर्शयन्नृपः॥४०॥ ददौ च
तां स कांतानां कलानामेकमास्पदं॥ कृतवर्मा सुतां तस्मै राज्ञे मूर्त्तिमिवैंदवीम्॥४१॥ परस्परगुणावाप्त्यै स श्रुत
प्रज्ञयोरिव॥ अभूत्सहस्रानीकस्य मृगावत्याश्च संगमः॥४२॥ अथ तस्याचिराद्राज्ञो मंत्रिणां जज्ञिरे सुताः
जज्ञे यौगंधरस्यापि पुत्रो यौगंधरायणः॥४३॥ सुप्रतीकस्य पुत्रश्च क्षेमगनिस जायत॥ यो स्य नर्मसुहृत्त
स्य पुत्रो जज्ञे वसंतकः॥४४॥ ततस्तस्यापि दिवसैः सहस्रानीकभूपतेः॥ बभार गर्भमापांडुमुखी राज्ञी मृगा
वती॥४५॥ ययाचे सा च भर्त्तारं दर्शनानंदलोचनम्॥ दोहदं रुधिरापूर्णलीलावापीनिमज्जनं॥४६॥ स चे
च्छां पूरयन्राजा लाक्षादिरसनिर्भरां॥ चकार धार्मिको रम्यां वापीं रक्तामृतामिव॥४७॥ तस्यां स्नातीमकस्मा
च्च लाक्षालिप्तां निपात्य तां॥ गरुडान्वयजः पक्षी जहारामिषशंकया॥४८॥ पक्षिणा क्वापि नीतां तां तामन्वे
ष्टुमिव तत्क्षणात्॥ ययौ सहस्रानीकस्य धैर्य्यं विह्वलचेतसः॥४९॥ प्रियानुरक्तं चेतोपि नूनं तस्य पतत्रि
णा॥ जह्रे स तेन निःसंज्ञः पपात भुवि भूपतिः॥५०॥ क्षणाच्च लब्धसंज्ञे स्मिन्राज्ञि बुध्वा प्रभावतः॥ अवती
र्य द्युमार्गेण तत्र मातलिराययौ॥५१॥ स राजानं तमाश्वास्य सावधिं प्राग्यथाकृतं॥ तस्मै तिलोत्तमाशापं क

थयित्वा ततोगमत्॥५२॥ हा प्रिये पूर्णकामासा जाता पापा यातिलोत्तमा॥ इत्यादि च सशोकांते विललाप महीपतिः॥
५३॥ विज्ञातनशापवृत्तांतै बोधितश्च समंत्रिभिः॥ कथं चिज्जीवितं दध्रे पुनःसंगमवांछया॥५४॥ तां च राज्ञी सपत्नी
दुःक्षणान्नीलाम्रगावती॥ जीवंतीं वीक्ष्य तत्याज दैवादुदयपर्वते॥५५॥ सस्नातस्मिन्नाते चाथ राज्ञी शोकभयाकु
ला॥ ददर्शानाथमात्मानं दुर्गमद्रिनटस्थितं॥५६॥ एकाकिनीमेकवस्त्रां क्रीडंतीमथतां वने॥ ग्रासीकर्तुं प्रवृत्तो भू
दुस्थायाजगरो महान्॥५७॥ निहत्याजगरं तं च प्रभुभोदकीनथैव सा॥ दिव्येन मोचिता पुंसा दृष्टनष्टेन केन चित्॥
५८॥ ततो वनगजस्याग्रे सा स्वयं मरणार्थिनी॥ आत्मानमक्षिपत्सोपि ररक्ष दययैव तां॥५९॥ चित्रं यच्छापदो
ष्वेनां पतितामपि गोचरे॥ नावधीदथ काकं हि न भवेदीश्वराज्ञया॥६०॥ अथ प्रयाताभिमुखी बाला गर्भभराल

रो

सा॥ स्मरंती तं च भर्त्तारं मुक्तकंठं रुरोद सा॥६१॥ न छूत्वा मुनिपुत्रोथ तत्रैकस्तां समाययौ॥ आगतः फलमूलार्थं
प्रभुचं मूर्त्तिमतीमिव॥६२॥ स च पृष्ट्वा यथावृत्तमाश्वास्य च कथं चन॥ जमदग्न्याश्रमं राज्ञीं निनाये नांदयार्द्रधीः॥
६३॥ तत्र मूर्त्तमिवाश्वासं जमदग्निं ददर्श सा॥ तेजसा स्थिरबालार्कं कुर्वाणमुदयाचलं॥६४॥ सो पितां पादप
तितां मुनिराश्रिनवत्सलः॥ राज्ञीं वियोगदुःखार्त्तां दिव्यदृष्टिरभाषत॥६५॥ दूहते जनिता पुत्रि पुत्रो वंशधरः पितुः

भविष्यति च भर्त्रा ते संगमो मा शुचं कृथाः ॥६६॥ इत्युक्ता मुनिना साध्वी सा जग्राह मृगावती ॥ आश्रमे च स्थितिं तस्मि
न्नाशां च प्रियसंगमे ॥६७॥ ततश्च दिवसैस्तत्र श्लाघनीयमनिंदिता ॥ तत्संगतिरिवाचारं पुत्ररत्नमसूत सा ॥६८॥
श्रीमानुदयनो नाम्ना राजा जातो महायशाः ॥ भविष्यति च पुत्रोस्य सर्वविद्याधराधिपः ॥६९॥ इत्यंतरिक्षादुदभूत्त
स्मिन्काले सरस्वती ॥ आदधाना मृगावत्याश्चिरविस्मृतमुत्सवं ॥७०॥ क्रमादुदयनः सोथ बालस्तस्मिंस्तपोवने ॥
अवर्द्धत निजैः सार्द्धं वयस्यैरिव सद्गुणैः ॥७१॥ कृत्वास्य क्षत्रोचितान्सर्वान्संस्कारान् जमदग्निना ॥ अनीयत स विद्या
सु धनुर्वेदे च वीर्यवान् ॥७२॥ दृष्ट्वा च स्वकरान्माता तस्य स्नेहान्मृगावती ॥ सहस्रानीकनामांकं चकार कटकं करे ॥७३॥
हरिणाखेटके जातु भ्राम्यन्नुदयनोथ सः ॥ शबरेण हठाक्रांतमटव्यां सर्पमैक्षत ॥७४॥ सदयः सुंदरे तस्मिन्सर्पे तं श
बरं च सः ॥ उवाच मुच्यतामेष सर्पो मद्वचनादिति ॥७५॥ ततः स शबरो वादीज्जीविकेयं मम प्रभो ॥ कृपणो हि नजी
वामि भुजगं खेलयन्सदा ॥७६॥ विपन्ने पन्नगे पूर्वे मंत्रौषधिबलादहं ॥ वष्टश्च मया लब्धा चिन्वतैतां महा
टवीं ॥७७॥ श्रुत्वेत्युदयनस्त्यागी दत्वास्मै शबरायतं ॥ कटकं जननीदत्तं स तं सर्पममोचयत् ॥७८॥ गृहीतकट
केयाते शबरे पुरतो नुतिं ॥ कृत्वा स भुजगः प्रीतो जगादोदयनं तदा ॥७९॥ सखा त्वं मम तेनाशु पातालं व्रज मद्गृहं ॥

ब॰क॰

४

इत्युक्त्वा नागभवनं निनाय तमुदारधीः॥८०॥ ततः प्रोवाच नागोथ तदोदयनमानतम्॥ वसुनेमिरिति ख्यातो ज्ये
ष्ठो भ्राता स्मि वासुकेः॥ इमां वीणां गृहाण त्वं मत्तः संरक्षितां त्वया॥ तंत्री निर्घोषरम्यां च श्रुतिभागविभाजितां॥८२॥
तांबूलीश्च सहाम्लायिमालां तिलकयुक्तिभिः॥ भगिनीललितानाभिरवरां मयि भाव्यां नरोत्तम॥८३॥ यस्यामुखशशि
द्योतैर्यातापातालकौमुदीः॥ तद्युक्तो जमदग्नेस्तं नागो क्षिप्तः स चाश्रमं॥८४॥ आगादुदयनो मातुर्दृशि वर्षन्निवा
मृतं॥ नकूर्भाधानपर्यंतं शापासाथभुजंगमी॥८५॥ ययौ विद्याधरपदं स्वयमामंत्र्य वल्लभं॥ अत्रांतरे स शबरोप्य
टवीं प्राप्य पर्यटन्॥८६॥ आदायोदयनात्प्राप्तं कटकं नदिधेर्वशान्॥ विक्रीणानश्च तत्तत्र राजनामांकमापणे॥
८७॥ वृत्तस्य राजपुरुषैर्निन्ये राजकुलं च सः॥ कुतस्त्वयेदं कटकं संप्राप्तमिति तत्र सः॥८८॥ राज्ञा सहस्रानीकेन
स्वयं शोकात् पृच्छत॥ अथोदयाद्रौ सर्पस्य ग्रहणात्प्रभृति स्वयं॥८९॥ कटकप्राप्तिवृत्तांतं शबरः स जगाद तं॥ तद्बु
ध्वा शबराद्दृष्ट्वा दयितावलयं च तं॥ विचारदोलामारोहन्सहस्रानीकभूपतिः॥ क्षीणः शापस ते राजन्नुदयाद्रौ
च सा स्थिता॥९१॥ जमदग्न्याश्रमे जाया सपुत्रा ते मृगावती॥ इति दिव्या दिवो वाणी नंदयामास तं नृपम्॥९२॥
विप्रयोगनिदाघार्त्तं वारिधारेव बर्हिणं॥ अथोत्कंठादीर्घे कथमपि दिने स्मिन्व्यवसिते तमेवाग्रेकृत्वा शबरमपरे

४

घुः सनृपतिः ॥९३॥ सहस्रानीकस्तां सरभससमवाप्तुं प्रियतमां प्रतस्थेन तैस्तैरन्यैः सममुदयशैलाश्रमपदं ॥९३॥
॥ इति श्री भट्टसोमदेवविरचिते कथासरित्सागरे कथामुखलंबके उदयनजन्म प्रथमस्तरंगः ॥१॥ आदितोन
वमस्तरंगः ॥९॥ सहस्रानीककथायां मृगावती प्रसूपलंवः ॥ गत्वाथ दूरमध्वानं राजा वसतिमग्रहीत् ॥ दिनेत
स्मिंस्तस्मिंश्चिदरण्ये सरसस्तटे ॥१॥ ज्ञायनीयगतः श्रांतस्तत्र सेवारसांगतां ॥ सायं संगतकं नाम जगादकथ
कं नृपः ॥२॥ कथामाख्याहि मे कांचिद्धृदयस्य विनोदिनीं ॥ मृगावतीमुखांभोजदर्शनोत्सवकांक्षिणः ॥३॥ अ
थ संगतको वादीद्देव तप्यसि किं वृथा ॥ आसन्न एव देव्यास्ते क्षीणशापः समागमः ॥४॥ संयोगाविप्रयोगाश्च भ
वंति बहवो नृणां ॥ तथा चात्र कथामेकां कथयामि शृणु प्रभो ॥५॥ मालवे यज्ञसोमाख्यो द्विजः कश्चिदभूत्सुरा ॥
तस्य च द्वौ सुतौ साधो र्जाये ने स्म जनप्रियौ ॥६॥ एकस्तयोरभून्नाम्ना कालनेमिरिति श्रुतः ॥ द्वितीयश्चापिवि
गतभयदत्ताख्ययाभवत् ॥७॥ पितरि स्वर्गते तौ च भ्रातरौ तीर्णशैशवौ ॥ विद्याप्राप्त्यै प्रययतुः पुरं पाट
लिपुत्रकं ॥८॥ तथैवोपात्तविद्याभ्यामुपाध्यायो निजे सुते ॥ देवशर्मा ददौ ताभ्यां मूर्ते विद्ये इवापरे ॥९॥ अ
थान्यान्वीक्ष्य तान्नाढ्यान्नरहस्या नीर्ष्यया श्रियं ॥ होमैः ससाधयामास कालनेमिः कृतव्रतः ॥१०॥ साचतुष्टा

मरवे साक्षादेव श्रीस्तमभाषत ॥ भूरि प्राप्स्यसि वित्तं च पुत्रं च पृथिवीपतिं ॥११॥ किंतु ते चौरसदृशो वधस्तव भविष्यति ॥ हुतमग्नौ त्वया यस्मादमर्षकलुषात्मना ॥१२॥ इत्युक्त्वांतर्दधे लक्ष्मीः कालनेमिरपि क्रमात् ॥ महाधनोभूत्किं चास्य दिनैः पुत्रोप्यजायत ॥१३॥ श्रीवरादेष संप्राप्त इति नाम्नात मात्मजं ॥ श्रीदत्तमकरोत्सोपि पिता पूर्णमनोरथः ॥१४॥ क्रमात्स वृद्धिं संप्राप्तः श्रीदत्तो ब्राह्मणोपि सन् ॥ अस्त्रेषु बाहुयुद्धेषु बभूवाप्रतिमो भुवि ॥१५॥ कालनेमेरथभ्राता तीर्थार्थी सर्पभक्षितां ॥ भार्यामुद्दिश्य विगतभयो देशांतरं ययौ ॥१६॥ श्रीदत्तोपि गुणज्ञेन राज्ञा वल्लभशक्तिना ॥ तत्र विक्रमशक्तेः सन्स्वपुत्रस्य कृतः सखा ॥१७॥ राजपुत्रेण तेनास्य सहवासोभिमानिना ॥ बाल्ये दुर्योधनेनेव भीमस्यासीत्तरस्विना ॥१८॥ द्वावेतस्याथ मित्रत्वं विप्रस्यावंतिदेशजौ ॥ क्षत्रियौ बाहुशाली च वज्रमुष्टिश्च जग्मतुः ॥१९॥ बाहुयुद्धजिताश्चान्ये दाक्षिण्यप्रियाः ॥ स्वयंवरसुहृत्वेन मंत्रिपुत्रास्तमाश्रयन् ॥२०॥ महाबलव्याघ्रबलावुपेंद्रबलइत्यपि ॥ तथा निष्ठुरको नाम सौहार्दं तस्य चक्रिरे ॥२१॥ कदाचिदथ वर्षासु विहर्तुं जाह्नवीतटे ॥ श्रीदत्तः सह तैर्मित्रै राजपुत्रसखो ययौ ॥२२॥ स्वभृत्यास्तत्र तं च क्रुर्निजं राजसुतं नृपं ॥ श्रीदत्तोपि स तत्कालं राजामित्रैरकल्प्यत ॥२३॥ तावता जातसेर्षेण राजपुत्रेण तेन सः ॥ विप्रवीरो रणायाशु समाहूतो मदस्पृशा ॥२४॥

सागुण

सतेन बाहुयुद्धेन श्रीदत्तेनाथ निर्जितः ॥ चकार हृदि वध्यं तु वर्द्धमानं कलंकितः ॥२५॥ ज्ञात्वा च तमभिप्रायं राजपुत्र
स्य शंकितः ॥ श्रीदत्तः सह तैर्मित्रैस्तत्समीपादपासरत् ॥२६॥ उपासर्पन्स चापश्यद्गंगामध्यगतां स्त्रियं ॥ ह्रियमाणां
जलौघेन सागरस्यामिव श्रियं ॥२७॥ ततश्चावननारेतामुद्धर्तुं जलमध्यतः ॥ षट्ठाहुशालिप्रमुखान्स्थापयित्वा
तटे सखीन् ॥२८॥ तां च केशेष्वपि प्राप्तां निमग्नां दूरमंभसि ॥ अनुसर्तुं प्रियां सोपि वीरस्तत्रैव मग्नवान् ॥२९॥ निम
ज्य च ददर्शात्र स श्रीदत्तः क्षणादिति ॥ शैवं देवकुलं [illegible] न पुनर्वारि न स्त्रियं ॥३०॥ ततो दृष्ट्वा महदाश्चर्य्य
श्चांतो नत्वा वृषध्वजं ॥ उद्याने सुंदरे तत्र तां निनाय विभावरीं ॥३१॥ प्रातश्च देवमीशानमापूजयितुमागता ॥ ददर्शैते
नमूर्त्तेव रूपश्रीः स्त्री गुणान्विता ॥३२॥ ईश्वरं पूजयित्वा च सा ततो निजमंदिरं ॥ ययौ विंदुमुखी सोपि श्रीदत्तोनुज
गाम तां ॥३३॥ ददर्श मंदिरं तच्च तस्याः सुरपुरोपमं ॥ + सः तत्र रात्रावकस्माच्च मुक्तनिद्रो ददर्श तां ॥७२॥ स्त्रियं निष्ठु
रकं हत्वा हर्षात्तन्मांसमश्नतीं ॥ उदतिष्ठत्तमारुष्य सोथ खड्गं मृगांकक ॥७३॥ सापि स्त्री राक्षसीरूपं घोरं स्वं प्रसप
द्यत ॥ स च केशेषु जग्राह निहंतुं तां निशाचरीं ॥७४॥ तत्क्षणं दिव्यरूपत्वं संप्राप्ता तमुवाच सा ॥ मां मा वधीन्महाभा
ग मुंच नैवास्मि राक्षसी ॥७५॥ अयमेवंविधः शापो मम भुक्तौशिकान्मुनेः ॥ तपस्यतो हि तस्याहं धनाधिपति

स्क. ६

नामुना ॥ ७६ ॥ विज्ञाय प्रेषिता पूर्वं तत्सद्प्राप्तिकांक्षिणः ॥ ततः कांतेन रूपेण तं क्षोभयितुमक्षमा ॥ ७७ ॥ लज्जितास्मि स्वयं तेन मत्कार्षं भैरवं वपुः ॥ तद्दृष्ट्वा स मुनिः शापं सदृशं मय्यथादधे ॥ ७८ ॥ राक्षसी भव पापे त्वं निघ्नती मानुषानिति ॥ त्वत्तः केशग्रहे प्राप्ते शापांतं मे स चाकरोत् ॥ ७९ ॥ असहं राक्षसीभावमिमं कष्टमुपागमम् ॥ मयैव नगरं ग्रस्तमेतदद्य च मे चिरात् ॥ ८० ॥ त्वया कृतः सशापांतस्तद्गृहाणाधुना वरं ॥ इति तस्या वचः श्रुत्वा श्रीदत्तः सादरोऽभ्यधात् ॥ ८१ ॥ किमन्येन वरेणांब जीवत्वेष सखा मम ॥ एवमस्त्विति सा चास्मै वरं दत्त्वा निरोदधे ॥ ८२ ॥ अक्षतांगः स चोत्तस्थौ जीवन्निसुरकोथसः ॥ तेनैव सह हृष्टः प्रातः प्रहृष्टो विस्मितश्च सः ॥ ८३ ॥ ततः प्रतस्थे श्रीदत्तः प्राप चोज्जयिनीं पुरीं ॥ ततः संभावयामास सखीन्मार्गोत्सुकान् सुतान् ॥ ८४ ॥ दर्शनेन यथायातो नीलकंठानिवांबुदः ॥ कृतातिथ्यविधिश्चासौ स्वगृहं बाहुशालिना ॥ ८५ ॥ नीतोऽभ्रत्कथिताशेषनिजवृत्तांतकौतुकः ॥ तत्रोपचर्यमाणः स नु पितृभ्यां बाहुशालिनः ॥ ८६ ॥ स उवास समं मित्रैः श्रीदत्तः स्वगृहे यथा ॥ कदाचित्सोथ संप्राप्ते मधुमासमहोत्सवे ॥ ८७ ॥ यात्रामुपवने द्रष्टुं जगाम सखिभिः सह ॥ तत्र कन्यां ददर्शैकां राज्ञः श्रीविंबकेः सुतां ॥ ८८ ॥ आगतामाकृतिमतीं साक्षादिव मधुश्रियं ॥ सा मृगांकवती नाम हृदयं तस्य तत्क्षणं ॥ ८९ ॥ विवेश दत्त

६

मार्गे वदृष्ट्वास्यस विकाशया तस्या अपि मुहुः स्निग्धा प्रथमप्रेमशंसिनी ॥ ९० ॥ न्यस्तातं प्रति दूतीव दृष्टिश्चक्रे गतागतं ॥
प्रविशंरक्षगहनं तामपश्यन्नथ क्षणात् ॥ ९१ ॥ श्रीदत्तः शून्यहृदयो दिङ्मोपि न ददर्श सः ॥ ज्ञातं मयाने हृदयं सर्वे माप
न्नवं कुथाः ॥ ९२ ॥ नदेस्य त्रैव गच्छामो यत्र राजसुतागता ॥ इत्युक्तश्चेंगितज्ञेन सुहृदा बाहुशालिना ॥ ९३ ॥ तथेति सययौ
तस्याः सन्निकर्षं सुहृत्सखः ॥ हा कष्टमहिना दष्टा राजपुत्री नितक्षणं मम् ॥ ९४ ॥ आक्रंदउदभूत्तत्र श्रीदत्तहृदयज्व
रः ॥ विषघ्नमंगुलीयं च विद्या च सुहृदोस्य मे ॥ ९५ ॥ अस्तीति गत्वा जगदे कंचुकी बाहुशालिना ॥ सा च तत्क्षणमभ्ये
सकंचुकीच्चरणानता ॥ ९६ ॥ निकटं राजदुहितुः श्रीदत्तमनयद्द्रुतं ॥ सोपि तस्यास्तदंगुल्यां निचिक्षेपांगुलीयकं ॥ ९७ ॥
ततो जजाप विद्यां च तेन प्रसुप्तिजीवसा ॥ अथ सर्वजने हृष्टे श्रीदत्तस्तत्क्षणे तत्सरे ॥ ९८ ॥ तत्रैव ज्ञातवृत्तां तो राजा
विवक्षिरायया ॥ तेन सो सखिभिः साकमगृहीतां गुलीयकः ॥ ९९ ॥ प्रत्याजगाम भवनं श्रीदत्तो बाहुशालिनः ॥ तत्र
तस्मै सुवर्णो दियत्नीतः प्राहिणोन्नृपः ॥ १०० ॥ तद्बाहुशालिनः पित्रे समर्थं समर्पयत् ॥ अथ तां चिंतयं कांतां सत
थापर्य्येतप्यत ॥ १ ॥ यथा किं कार्यता मूढा वयस्यास्ते स्यजज्ञिरे ॥ ततो भावनिका नाम राजपुत्र्याः प्रियासखी ॥ २ ॥ अं
गुलीयार्पणव्याजात्तस्यां निकमुपाययौ ॥ उवाच चैनं मत्सखास्तस्याः सुभगसांप्रतम् ॥ ३ ॥ त्वं वा प्राणप्रदो भर्त्ता

मृत्युर्वा धेनिनिश्चयः॥इत्युक्ते भावनिकया श्रीदत्तश्च ससापि च॥४॥बाहुशाली च ते न्ये च मंत्रं संभूय चक्रिरे॥ हरोमो
निभृतं युत्स्याराजपुत्री मिमां वयं॥५॥निवासहेतोर्गुप्तं च गच्छामो मथुरामितः॥इति संमंत्रिते सम्यक्कार्य सिद्धे च सं
सदि॥६॥अन्योन्यं स्यापितायां सायया भावनिकाननः॥अन्येद्युर्बाहुशाली च वयस्य त्रितया न्वितः॥७॥वाणि
ज्यव्यपदेशेन जगाम मथुरां प्रति॥सगच्छन्स्थापयामास वाहनानि पदे पदे॥८॥राजपुत्र्याभिसाराय गूढ निचतु
राणि च॥श्रीदत्तोपि ततः कांचिदुहित्रा सहितां स्त्रियं॥९॥सायं राजसुतावासे प्रापयित्वार निंब्यधात्॥ततोत्र
दीपोद्देशेन दत्वाग्निं वासवेश्मनि॥१०॥प्रच्छन्नं भावनिकया निन्ये राजसुता वहिः॥तत्क्षणं तां च संप्राप्य श्रीदत्तः स
बहिःस्थितः॥११॥प्राक्प्रस्थितस्य निकटं प्राहिणोद्बाहुशालिनः॥ददौ मित्रद्वयं चास्याः पश्चाद्भावनिका तथा॥
१२॥तन्मंदिरे च दग्धा साक्षीवा स्त्री सुतया सह॥लोकस्तु तां सखी युक्तां मेने दग्धां नृपात्मजां॥१३॥प्रातश्च पूर्व
वत्तत्र श्रीदत्तो ददृशे जनैः॥ततो रात्रौ द्वितीयस्यां सगृहीतमृगांककः॥१४॥श्रीदत्तः प्रययौ पूर्वं प्रस्थितां तां प्रि
यां प्रति॥तया च रात्र्याति क्रम्य दूरं पंथानमेव सः॥१५॥विंध्याटवीमथ प्राप स प्रातः प्रहरे गते॥तत्रादाव
निमित्तानि पश्चात्स यि ददर्श तां॥१६॥सर्वान्प्रहाराभिमतान्सह भावनिकान्सखीन्॥ते च दृष्ट्वा निजगदु

स्तं संभ्रांतमुपागमत् ॥१७॥ मुषिताः स्मो निपत्याद्य वद्धाश्वारोहसेनया ॥ एकेन राजपुत्रेण राजपुत्री भयाकुला
॥१८॥ अस्मास्वेतदवस्थेषु नीताश्वमधिरोप्य सा ॥ दूरं नयावन्नीता च ता वकृछानया दिशा ॥१९॥ अस्माकं मंतिदे
मास्थाः सर्वथाभ्यधिकाच सा ॥ इति तैः प्रेषितो मित्रैर्मुहुः पश्यन्विरसः सः ॥२०॥ जवेन राजतनयां श्रीदत्तोनुस
सार तां ॥ गत्वा स दूरं लेभे च नाममश्वारोहवाहिनीं ॥२१॥ युवानमेकं तन्मध्ये क्षत्रियं च ददर्श च ॥ तेनोपरि तुरं
गस्य गृहीतां तां नृपात्मजां ॥२२॥ अपनेयच्चाययौ चास्य क्षत्रयूनोतिकं क्रमात् ॥ सांत्वेन राजपुत्री तां ममुंच
त्तं च पादनः ॥२३॥ अश्वादाक्षिप्य दृषदि श्रीदत्तस्तमचूर्णयत् ॥ तं च हत्वा तमेवाश्वमारुह्य निजघान तान् ॥
२४॥ अन्यानपि बहून्क्रुद्धानश्वारोहान्नवाधितान् ॥ हतशेषास्ततश्चान्ये तदृष्ट्वा तस्य तादृशं ॥२५॥ वी
रस्यामानुषं वीर्यं पलाय्य सभयं ययुः ॥ स चापि तुरगारूढो राजपुत्र्या तया सह ॥२६॥ मृगांकवसाः श्रीदत्तः प्र
तस्थे तान्सखीन्प्रति ॥ स्तोकं गत्वा च तस्याश्वः संग्रामे व्रणितो भृशं ॥२७॥ स भार्यस्यावनी रणीस्य पपात प्राप
पंचतां ॥ तत्कालं चास्य तत्रैव सा मृगांकवती प्रिया ॥२८॥ त्रासायासपरिश्रांता तृषार्ता समपद्यत ॥ स्थापयि
त्वा च तत्रैव गत्वा दूरमितस्ततः ॥२९॥ जलमन्विष्यतश्चास्य सविता स्तमुपाययौ ॥ ततः स लब्धेपि जले मा

वं०कः

र्गेनाञ्चवशाद्भ्रमन् ॥३०॥ चक्रवाकवदुत्कूजं स्तांनिनाय निशां वने ॥ प्रातःप्राय च तत्स्थानं पतिताश्वोपलक्षणं ॥
३१॥ न च तत्र क्वचित्कांतां राजपुत्रीददर्शतां ॥ ततः समोहाद्धिन्नस्य भुवि स्वडूंम्रगांककं ॥३२॥ वृक्षाग्रमारूरोहैनोमवेक्षि
तुमितस्ततः ॥ तत्क्षणं तेन मार्गेणकोप्यागछवराधिपः ॥३३॥ स चागत्यैव जग्राह वृक्षमूलान्म्रगांककं ॥ तं दृष्ट्वा
पि स वृक्षाग्राद वती र्य्यैव परुरवान् ॥३४॥ प्रियाप्रवृत्तिमस्त्रांत्तः श्रीदत्तः शबराधिपं ॥ दूतस्त्वं गछ मत्पल्लींजाने
सा तत्र ने गता ॥३५॥ अहं तत्रैव चेष्यामि दास्याम्यसिमिमं च ते ॥ इत्युक्ताप्रेषितस्तेन शबरेण स चोन्मुखः ॥३६॥
श्रीदत्तस्तां ययोपल्लीं तदीयैः पुरुषैः सह ॥ श्रमं तावद्विमुंचेति तत्रोक्तः पुरुषैश्चतैः ॥३७॥ प्राप्य पल्लीपतेर्गे
हं श्रांतो निद्राक्षणं ययौ ॥ प्रबुद्धश्चददर्शस्वौ पादौ निगडसंयुतौ ॥३८॥ अलब्ध्वा तत्रू तीकांता प्राप्तुपायोद्य
माविव ॥ अथक्षणं दत्तसुखां क्षणांतर विमाथिनीं ॥३९॥ देवस्यैव गतिं तत्र तस्थौ शोचत्सतां प्रियां ॥ एकदा
तमुवाचैत्य चेटी मोचनिकाभिधा ॥४०॥ आगतोसि महाभाग कुत्रेह वनमृत्सवे ॥ कार्य्यसिध्यै सहि क्वापि
प्रयातः शबराधिपः ॥४१॥ आगत्य चंडिकायास्त्वामुपहारी करिष्यति ॥ एतदर्थं हि तेन त्वमितो विंध्याटवीत
टात् ॥४२॥ प्राप्य युक्त्या विसृज्येह नीतः संप्रतिबंधनं ॥ भगवत्युपहारत्वे यत एवासि कल्पितः ॥४३॥ अतएव

सदा वस्त्रैर्भोजनैश्चोपचर्यसे ॥ एकोद्यमुक्त्युपायस्ते विघ्नेयदि मन्यसे ॥४४॥ अस्त्यस्य सुंदरी नाम नृपावराधि
पतेः सुता ॥ असमर्थे सा च दृष्ट्वा त्वां जायते मदनातुरा ॥४५॥ मां भजस्व वयस्यां मे ततः क्षेममवाप्स्यसि ॥ तथेत्यु
क्त्वा विमुक्त्यर्थे स श्रीदत्तस्तथेति तां ॥४६॥ गांधर्वविधिना गुप्तं भार्यां व्यधित सुंदरीं ॥ रात्रौ रात्रौ च सा तस्य बंध
नान्निन्यवारयत् ॥४७॥ अचिराच्च सगर्भा सा सुंदरी समपद्यत ॥ तत्सर्वमथ तन्माता बुध्वा मोचनिकामुखा
त् ॥४८॥ जामातृस्नेहतो गत्वा स्वैरं श्रीदत्तमब्रवीत् ॥ पुत्र श्रीचंद्रनामा सौ कोपनः सुंदरी पिता ॥४९॥ नैतां
क्षमेत तत्कृच्छ विस्मर्त्तव्या न सुंदरी ॥ इत्युक्त्वा मोचितः श्वश्र्वा खड्गं श्रीदत्तहस्तगं ॥५०॥ स्कंदयौ निजमावेद्य श्री
दत्तः प्रययौ ततः ॥ विवेशाचाद्यां तामेव चिंताक्रांतो निजाटवीं ॥५१॥ मृगांकवत्याः पदवीं तस्या जिज्ञासितुं पु
नः ॥ निमित्तं चाशुभं दृष्ट्वा तमेवोद्देशमाययौ ॥५२॥ यत्रास्याऽश्वो मृतस्सोथ यत्र सा हारिता वधूः ॥ तत्रैवै
कं ददर्शाराल्लुब्धकं संमुखागतं ॥५३॥ दृष्ट्वा च पृष्टवांस्तस्याः प्रवृत्तिं हरिणीदृशः ॥ किं श्रीदत्तस्त्वमित्युक्तो
लुब्धकेन च तत्र सः ॥५४॥ स एव मंदभाग्योहमित्युवाच विनिःश्वसन् ॥ ततः स लुब्धको वादीत्तर्हि वच्मि स
खे शृणु ॥५५॥ दृष्ट्वा सा तेन मया भार्या क्रंदंती त्वामितस्ततः ॥ दृष्ट्वा तत्तश्च वृत्तांतमाश्वास्य च कृपाकुलं ॥५६॥

निजांपल्लीमितोरण्याद्दीनार्त्तोनीनवाहनम्॥ तत्रचाज्ञोक्यतरुणानुलिंदान्सुभयेनसा॥५७॥ मथुरानिकटंग्रामंनीतानागस्थलंमया॥ तत्रचस्यापितागेहेस्थविरस्यद्विजन्मनः॥५८॥ विश्वदत्ताभिधानस्यन्यासीकृत्य सगौरवं॥ ततश्चाहमिहायातोबुध्वात्वन्नाममन्मुखात्॥५९॥ तामन्वेष्टुंततोगच्छश्रीघ्रंनागस्थलंप्रति॥ इत्युक्तो लुब्धकेनाशुसश्रीदत्तस्ततोययौ॥६०॥ तंचनागस्थलंप्रापदपरेद्युर्दिनात्यये॥ भवनंविश्वदत्तस्यप्रविश्याथ विलोक्यतं॥६१॥ ययाचेदेहिमेभार्यांलुब्धकस्थापितामिति॥ तच्छ्रुत्वाविश्वदत्तस्तंश्रीदत्तंनिजगादसः॥६२॥ मथुरायांसुहृन्मेस्तिब्राह्मणोगुणिनांप्रियः॥ उपाध्यायश्चमंत्रीचशूरसेनस्यभूपतेः॥६३॥ तस्यहस्तेत्वदीयासागेहिणीस्थापितामया॥ अयंहिविजनोग्रामोनतद्रक्षाक्षमोभवत्॥६४॥ तस्मात्तस्तत्रगच्छत्वमद्यविश्राम्यतामिति॥ इत्युक्तोविश्वदत्तेनसनीत्वात्रैवतांनिशां॥६५॥ प्रातःप्रतस्थेप्रापच्चमथुरामपरेदिने॥ दीर्घाध्वमालिनस्तत्रनगरेबहिरेवसः॥६६॥ स्नानंचक्रेपरिश्रांतोनिर्मलेदीर्घिकाजले॥ ततएवांबुमध्याद्वस्त्रंचौरनिवेशितं॥६७॥ प्राप्तवानंचलग्रंथिबद्धहारमशंकितं॥ अथतद्वस्त्रमादायसतंहारमलक्षयत्॥६८॥ प्रियांदिदृक्षुः श्रीदत्तोविवेशमथुरांपुरीं॥ तत्रतत्प्रसभिज्ञायवस्त्रंहारमवाप्यच॥६९॥ सचौरइसवश्चम्यनिन्येनगररक्षिभिः

दर्शितश्च तथाभूतो नगराधिपतेऽश्वैतेः ॥७०॥ तेनाप्यावेदितो राज्ञे राजाप्यस्यादिशद्वधं ॥ ततो वध्यभुवं हंतुं नीय
मानं ददर्श तं ॥७१॥ सा मृगांकवती दूरात्सख्या सह । तदिंडिमं ॥ सोयं मे नीयते भर्त्ता वधायेति ससंभ्रमं ॥७२॥ सा गत्वा
मंत्रिमुख्यं तमब्रवीद्गृहे स्थिता ॥ निवार्य वधकात्सोथ मंत्री विज्ञाप्य भूपतिम् ॥७३॥ श्रीदत्तं मोचयित्वा तं व
धादानाययद्गृहं ॥ कथं सोयं पितृव्यो मे गत्वा देशांतरं पुरा ॥७४॥ इहैव दैवाद्विगनगृहं प्राप्तोद्य मंत्रिनां ॥ इति तं मंत्रि
णं सोथ श्रीदत्तस्तद्गृहागतः ॥७५॥ प्रत्यभिज्ञातवान्दृष्ट्वा पपात तस्य च पादयोः ॥ सोपि तं प्रत्यभिज्ञाय भ्रातुःपुत्रं स
विस्मयः ॥७६॥ कंठे जग्राह सर्वं च वृत्तांतं परिपृष्टवान् ॥ ततश्च तस्मै निखिलं श्रीदत्तः स्वपितुर्वधात् ॥७७॥ आ
रभ्य निजवृत्तांतं पितृव्याय न्यवेदयत् ॥७८॥ सोपि मुक्त्वाश्रु विजने भ्रातुःपुत्रं तमभ्यधात् ॥७८॥ अथ चिंता मा कृथाः
पुत्र मम सिद्धा द्विपक्षिणी ॥ पंचवाजिसहस्राणि हेमकोटीश्च सप्त सा ॥७९॥ प्रादान्मह्यमपुत्राय तत्तवैवाखिलं
धनं ॥ इत्युक्त्वा स पितृव्यस्तां श्रीदत्तायार्पयत्स्त्रियां ॥८०॥ श्रीदत्तोप्याप्तविभवस्ततस्तां परिणीतवान् ॥ ततश्च त
स्थौ तत्रैव संगतः कांतया तया ॥८१॥ मृगांकवत्या सानंदो राज्येव कुमुदाकरः ॥ बाहुशाल्यादिचिंता तु तस्याभूत्पूर्ण
संपदः ॥८२॥ इंदोः कलंककलेखेव हृदि मालिन्यदायिनी ॥ एकदा स पितृव्यस्तं रहः श्रीदत्तमभ्यधात् ॥८३॥ पुत्र राज्ञः

ब॰क॰

१०

सुता स्तस्य शूरसेनस्य कन्यकाः॥ मया चावंतिदेशे सा नेया दातुं तदाज्ञया॥८४॥ तन्ने नैवापदेशेन हृत्वा तुभ्यं ददामि
तां॥ ननस्तदनुगे प्राप्ते वलेसनिच मामके॥८५॥ यद्राज्यं ते श्रिया दिष्टं तस्मात्प्राप्यस्य चिरादिति॥ निश्चिसैतच्च तां कन्यां
गृहीत्वा ययतुस्ततः॥८६॥ श्रीदत्तस्तमित्रव्यश्च ससैन्यो सपरिग्रहो॥ ततो विंध्याटवीमेतौ प्राप्तमात्रावतर्कितो॥८७॥
चौरसेनातिमहती रुरोध शरवर्षिणी॥ प्रहारमूर्छितं वुध्वा श्रीदत्तं भग्नसैनिकं॥८८॥ निन्युश्चौराः स्वपल्लीं नास्वी
कृस सकलं धनं॥ तेच तं प्रापयामासुश्चंडिकासद्म भीषणं॥८९॥ उपहाराय घंटानां नादैर्मेसुमिवाह्वयत्॥ तत्रा
पश्यच्च सा पल्लीतं पल्लीयतिपुत्रिका॥९०॥ सुंदरी दृष्टमायाता देवी वालसुतान्विता॥ निषिद्धवसा मध्यस्यान्दस्यो
नानंदपूर्णया॥९१॥ स श्रीदत्तस्तया साकं तन्मंदिरमथाविशत्॥ तदैव पल्लीराज्यं तत्राप पित्रायदर्पितम्॥९२॥
प्रागेवानन्यपुत्रेण सुंदर्यै गच्छता दिवं॥ तं च चौरसमाक्रांतं स पितृव्यं परिच्छदं॥९३॥ सकलत्रं चलेभे सोतं
खड्गं च मृगांगकं॥ तत्रैव शूरसेनस्य तां कन्यां परिणायच॥९४॥ श्रीदत्तोपि महानूराजा नगरे समपद्यत॥ प्रति १०
ष्ठाय स दूतांश्च तयोः श्वशुरयोर्द्वयोः॥९५॥ विंवकेस्तस्य तस्यापि शूरसेनस्य भूपतेः॥ तमुपाजग्मतुस्तौ च से
नासमुदयान्वितो॥९६॥ तं विज्ञायैव संबंधं मुदा दुहितृवत्सलौ॥ तेपि रूढव्रणस्वस्थास्तद्विक्ता वयस्यकाः॥९७॥

बाहुशालिप्रभृतयस्तद्ध्यानमुपाययुः ॥ अथश्वसुरसंयुक्तो षेत्वातं पितृघातिनं ॥ ९८ ॥ चक्रे विक्रमशक्तिं स वीरः
क्रोधानलाहुतिं ॥ ततश्च साब्धिवलयां भ्रादत्तः प्राप्य मेदिनीं ॥ ९९ ॥ ननंद विरहोत्तीर्णः समृगांकवतीसखः ॥ दुःस्थं नरप
तेर्दीर्घवियोगव्यसनार्णवं ॥ १०० ॥ तरंति चलभं तेच कल्याणं धीरचेतसः ॥ दूति संगमकांक्षता कथां सदयितो त्सवः
॥ १ ॥ तां निनाय निशां मार्गे सहस्रानीकभूपतिः ॥ ततो मनोरथारूढः पुरः प्रहितमानसः ॥ २ ॥ प्रातः सहस्रानीको सौ
प्रतस्थे स्वां प्रियां प्रति ॥ दिनैः कतिपयैस्संच जमदग्नेरवापसः ॥ ३ ॥ मृगैरपि परित्यक्तचापलं श्रांतमाश्रमं ॥ ददर्श
कल्पितातिथ्यं जमदग्निं च तत्र तं मू ॥ ४ ॥ प्रणतः पावनालोकामाकारं तपसामिव ॥ स च तस्मै मुनी राज्ञे सपुत्रां तां
समर्प्पयत् ॥ ५ ॥ चिरान्मृगावती राज्ञी सानंदामिव निर्वृतिं ॥ शापांते तत्र दंपत्योस्तयोरन्योन्यदर्शनं ॥ ६ ॥ आनं
दबाष्पपूर्णायां ववर्षे वामृतं दृशि ॥ तत्पूर्वदर्शनं पुत्रमालिंग्योदयनं सतां ॥ ७ ॥ मुमोच नपतिः कृच्छ्राद्रोमांचेनेव
कीलितां ॥ ततः सोदयनां राज्ञी तामादाय मृगावतीं ॥ ८ ॥ आतपोवनमुद्धुष्यैरनुयातो मृगैरपि ॥ आमंत्र्य जमदग्निं
च प्रतस्थे स्वां पुरीं प्रति ॥ ९ ॥ प्रशांतादाश्रमात्तस्मात्सहस्रानीकभूपतिः ॥ शृण्वन्विरहवृत्तानि प्रियाया वर्णयं
श्च सः ॥ ११० ॥ उत्तोरणपताकां तां कौशांबीं प्राप्तवान्क्रमात् ॥ संमं च पत्नीपुत्राभ्यां प्रविवेश सतां पुरीं ॥ ११ ॥ पीय

मानमिवोसक्षाराजिभिः पौरलोचनैः॥ अभ्यषिंचच्च तं तत्र क्रमेणोदयनं सुतं॥१२॥ यौवराज्ये महाराजः प्रेर्य्यमाणः
स तद्गुणैः॥ स्वमंत्रिपुत्रांस्तस्मै स मंत्रहेतोः॥ समर्प्पयत्॥१३॥ वसंतकं कुमाराचं तौ न तथा यौगंधरायणं॥ एभिमंत्रिवरै
रेष कृत्स्नां प्राप्स्यति मेदिनीं॥१४॥ इति वागुदभूद्दिव्या पुष्पवृष्ट्या सममं तदा॥ ततः सुतन्यस्तभरः स राजा चिरकांक्षितं
॥१५॥ जीवलोकसुखं भेजे मृगावत्यानया सह॥ अथ तस्य जरां प्रज्ञां ति दूतीमुपयातां क्षितिपस्य कर्णमूलं॥१६॥
सहसैव विलोक्य जातकोपा बत दूरे विषयस्पृहा व धूव॥ ततस्तं कल्याणं नयस मनुरक्तप्रकृतिकं निवेश्य स्वेरा
ज्ये जगदुदयहेतोरुदयनं॥१७॥ सहस्रानीको सौ सचिवसहितः सप्रियतमो महाप्रस्थानाय क्षितिपतिरगच्छ
द्धिमगिरिं॥२१८॥ इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे कथामुखलंबके द्वितीयस्तरंगः॥२॥ आदि
तः॥१०॥ ततः स वत्सराज्यं च प्राप्य पित्रा समर्पितं॥ कौशांब्यवस्थितः सम्यक् कृशशासोदयनप्रजाः॥१॥ यौगं
धरायणाद्येषु भारं विन्यस्य मंत्रिषु स बभूव शनैराजा सुखैकतत्परः॥२॥ सदा सिषेवे मृगयां वीणां घोषवतीं
च तां॥ दत्तां वासुकिना पूर्वं नक्तंदिनमवादयत्॥३॥ तत्तंत्रीकलनिर्ह्रादमोहमंत्रवशीकृतान्॥ आनिताय चसं
यम्य स दाम तानन्वद्विपान्॥४॥ सर्वोरिनारी वक्त्रेंदुप्रतिमालंकृतां सुरां॥ मंत्रिणांच मुखच्छायां वत्सराजः समंय

ये॥५॥कुलरूपानुरूपास्ते भार्या क्कापि न विद्यते॥एका वासवदत्तारव्या कन्यका श्रूयते परम्॥६॥कथं प्राप्ये
त सा चेति चिंतामेकामुवाह सः॥सोपि चंडमहासेन उज्जयिन्यामचिंतयत्॥७॥तुल्यो मद्दुहितुर्भर्त्ता जगत्यस्मि
न्न विद्यते॥अस्ति तूदयनो राजा विपक्षः स च मे सदा॥८॥तत्कथं नाम जामाता वश्यश्च स भवेन्मम॥उपायस्त्वे
क एवास्ति यदटव्यां भ्रमत्यसौ॥९॥एकाकी द्विरदान्बध्नन्मृगयाव्यसनी नृपः॥तेन छिद्रेण तं युक्त्या वश्म्याना
ययाम्यहं॥१०॥गांधर्वज्ञस्य तस्यै तां सुतां शिष्यीकरोमि च॥ततश्चास्यां स्वयं तस्य चक्षुःस्ति[illegible] संशयं॥११॥
एवं सममजामाता वश्यश्च नियतं भवेत्॥नान्योस्त्युपायकोप्यत्र येन वश्यो भवेत्स सः॥१२॥इति संचिंत्य स तत्सि
द्ध्यै स गत्वा चंडिकागृहं॥चंडीमभ्यर्च्य तुष्टाव चक्रे स्यानुपयाचितं॥१३॥एतत्संपद्यते राजन्नचिराद्वांछि
तं तव॥इति शुश्राव तत्रासावशरीरां सरस्वतीं॥१४॥ततस्तुष्टः समागत्य बुधदत्तेन मंत्रिणा॥स च चंडम
हासेनस्तमेवार्थमचिंतयत्॥१५॥मानोद्धतो वीतलोभो रक्तभृत्यो महाबलः॥असाध्येपि स सामादेः सा
म्ना तावन्निरूप्यतां॥इति संमंत्र्य स नृपो दूतमेकं समादिशत्॥गच्छ मद्वचनाद्ब्रूहि वत्सराजमिदं वच॥१७॥
मत्सुत्री तव गांधर्वे शिष्या भवतुमर्हति॥स्नेहोप्यस्मासु चेत्तत्वं तामिहैवेत्य शिक्षय॥१८॥इत्युक्तः प्रेषितस्तेन

शि

बृ·क·

दूतोगत्वान्यवेदयत् ॥ कौशांब्यावत्सराजायसंदेशं तंतथैवसः ॥१९॥ वत्सराजोपितछ्रुत्वादूतादनुचितंवचः
यौगंधरायणस्येदमेकांते मंत्रिणोब्रवीत् ॥२०॥ किमेतत्तेनसंदिष्टंसदर्पंममभूभुजा ॥ एवंसंदिशतस्तस्यको
भिप्रायोदुरात्मनः ॥२१॥ इत्युक्तोवत्सराजेनतदायोगंधरायणः ॥ उवाचैवंमहामंत्रीसस्वामिहितनिष्ठुरः ॥

१२

॥२२॥ भुविव्यसनितारव्यातिःप्ररूढानेलतेवया ॥ इदंतस्यामहाराजकषायकटुकंफलं ॥२३॥ सहित्वांरागि
णंमत्वाकन्यारत्नेनलोभयन् ॥ नीत्वाचंडमहासेनोवध्वास्वीकर्तुमिछति ॥२४॥ तन्मुंचव्यसनानित्वंसु
सखेनहिपरैर्नृपाः ॥ सीदंतस्तेषुगृह्यंतेरवातेष्विववनद्विपाः ॥२५॥ इत्युक्तेमंत्रिणाधीरःप्रतिदूतंव्यसर्ज्ज
यत् ॥ सवत्सराजस्तंचंडमहसेननृपंप्रति ॥२६॥ संदिदेशचयद्यस्तिवांछामछिष्यतांप्रति ॥ त्वसुत्यास्तदि
हैवैषाभवताप्रेष्यतामिति ॥२७॥ एवंकृत्वाचसचिवान्वत्सराजोजगादसः ॥ यामिचंडमहासेनमिहबध्वा
नयामितं ॥२८॥ तछ्रुत्वातमुवाचाग्र्योमंत्रीयोगंधरायणः ॥ नचैतछक्यतेकर्तुंराजनैवचयुज्यते ॥२९॥
सहिप्रभाववान्राजास्वीकार्यश्चतवप्रभो ॥ तथाचतत्कृतंसर्वंश्रृण्विदंकथयामिते ॥३०॥ अस्तीहोज्जयिनीना
मनगरीभूषणंभुवः ॥ हसंतीवसुधाधौतैःप्रासादैरमरावती ॥३१॥ यस्यांवसतिविश्वेशोमहाकालवपुःस्वयं ॥

१२

शिथिलीकृतकैलासनिवासव्यसनो हरः ॥ तस्यां महेंद्रवर्माख्यो राजाभूद्भूभृतां वरः ॥ जयसेनाभिधस्त
स्य बभूव सदृशः सुतः ॥३३॥ जयसेनस्य तस्याथ पुत्रो प्रतिमदोबलः ॥ समुत्पन्नो महासेननामा नृपति
कुंजरः ॥३४॥ सोऽथ राजा स्वराज्यं तत्पालयन्समचिंतयत् ॥ न मे खड्गोऽनुरूपोऽस्ति न च भार्या कुलोन्नता ॥३५॥
इति संचिंत्य स नृपश्चंडिकागृहमागमत् ॥ तत्रातिष्ठन्निराहारो देवीमाराधयंश्चिरं ॥३६॥ उत्कृत्याथ स्वमां
सानि होमकर्म स चाकरोत् ॥ ततः प्रसन्ना साक्षात्सा देवी चंडी तमभ्यधात् ॥३७॥ प्रीतास्मि ते गृहाणेमं
पुत्र खड्गोत्तमं मम ॥ एतत्प्रभावाच्छत्रूणामजेयस्त्वं भविष्यसि ॥३८॥ किंचानंगवतीं नाम कन्यां त्रैलो
क्यसुंदरीम् ॥ अंगारकासुरसुतां शीघ्रं भार्यामवाप्स्यसि ॥३९॥ अतीव चंडकर्मेह कृतं चैतद्यतस्त्वया ॥
अतश्चंडमहासेन इत्याख्यातो भविष्यसि ॥४०॥ इत्युक्त्वा दत्तखड्गा सा देवी तस्य तिरोऽभवत् ॥ राज्ञः संक
ल्पसंपत्तिहृष्टिराविरभूत्पुनः ॥४१॥ स खड्गो मत्तहस्तींद्रो नडागिरिरिति प्रभो द्वे तस्य रत्ने शक्रस्य कुलिशै
रावणाविव ॥४२॥ तयोः प्रभावात्सुखितः कदाचित्सोऽथ भूपतिः ॥ अगाच्चंडमहासेनो मृगयायै महाट
विं ॥४३॥ अतिप्रमाणं तत्रैकं वराहं घोरमैक्षत ॥ नैशं तम इवाकांडे दिवापिंडत्वमागतम् ॥४४॥ स वराहः

शरैरस्यतो ह्येोरप्यरुनंव्रणः॥ अहससस्यंदनं राज्ञः पलाय्य बिलमाविशत्॥४५॥ राजापि रथमुत्सृज्य तमे
वानुसरन् क्रुधा॥ धनुर्द्वितीयस्तत्रैव प्रविवेशः स बिलांतरं॥४६॥ दूरं प्रविश्य चापश्यत्क्रांतं पुरवरं महत्॥ सवि
स्मयोन्यषीदच्च तदंतदीर्घिकातटे॥४७॥ तत्रस्थः कन्यकामेकामपश्यत्स्त्रीगणान्वितां॥ संचरंतीं स्मरस्येव
धैर्यनिर्भेदिनीमिषुं॥४८॥ सापि प्रेमरसासारवर्षिणा चक्षुषा मुहुः॥ स्नपयंती व राजानं ज्ञानं केस्तमुपागम
त्॥४९॥ कस्त्वं सुभग कस्माच्च प्रविशोसीह सांप्रतं॥ इत्युक्तः सा तया राजा यथातत्त्वमवर्णयत्॥५०॥ यच्छ्रुत्वा
नेत्रयुगलात्सरागामश्रुसंततिं॥ हृदया द्वीरतां चापि समं कन्या मुमोच सा॥५१॥ का त्वं रोदिषि कस्माच्च पृष्टा तेन
नेति भूभृता॥ तं साप्रसब्रवीदेवं मन्मथाज्ञानुवर्तिनी॥५२॥ यो वराहः प्रविशेत्रसदैत्योगारकारभिधः॥ अ
हं चैतस्य तनया नान्मांगारवती नृप॥५३॥ वज्रसारमयश्चासौ राजपुत्रीरिमाः शतं॥ आच्छिद्य राज्ञां गेहेभ्यः
परिवारं व्यधान्मम॥५४॥ किं चैष राक्षसीभूतः शापदोषान्महासुरः॥ तस्मान्श्रमार्त्तश्चाद्य तां प्राप्यापि सकुवा
नयं॥५५॥ इदानीं चास्त वाराहरूपो यं स्वपिति स्वयं॥ सुप्तोत्थितश्च नियतं त्वयि पापं समाचरेत्॥५६॥ इति मेत
वकल्याणमपश्यं सा गलं समी॥ संतापक्वथिताः प्राणा इव बाष्पांबुबिंदवः॥५७॥ इत्यंगारवती वाक्यं श्रुत्वा

राज्ञाजगादतां॥यदिमय्यस्तितेस्नेहः तदिदंमद्वचःकुरु॥५६॥प्रबुद्धस्यास्यगत्वात्वंरुदिहिस्वपितुःपुरः॥ततश्चनि
यतंसत्वांपृच्छेदुद्वेगकारणं॥५९॥त्वांचेन्निपातयेत्कश्चित्ततोमेकागतिर्भवेत्॥एतद्दुःखंसमेसेवसचवाच्यस्त्व
यातनः॥६०॥एवंकृतेस्तिकल्याणंतवापिचममापिच।इत्युक्तानेनसाराज्ञातथेत्यंगीचकारतं॥६१॥तंचछन्नमव
स्थाप्यराज्ञानंपापशंकिनी॥अगादसुरकन्यासाप्रसुप्तस्यांतिकंपितुः॥६२॥सोथदैत्यःप्रबुबुधेप्रारेभेराचरोदि
तुं॥किंपुत्रिरोदिषीत्येवंसचतामब्रवीत्ततः॥६३॥हन्यात्वांकोपिचेत्तात तदामेकागतिर्भवेत्॥इत्यार्त्तातमवादीत्सा
सविहस्यततोब्रवीत्॥६४॥कोमांघातयेत्पुत्रिसर्वंवज्रमयोस्म्यहं॥वामहस्तेस्तिमेछिद्रंतच्चवायेनरक्ष्यते॥६५॥
इत्थमाश्वासयामाससदैत्यस्तांनिजांसुतां॥एतच्चनिखिलंतेनराज्ञाछन्नेनशुश्रुवे॥६६॥ततःक्षणादिवोत्थाय
कृत्वास्नानंसदानवः॥कृतमौनःप्रववृतेदेवंपूजयितुंहरं॥६७॥तत्कालंप्रकटीभूयसराजाकृष्टकार्मुकः॥उपेत्य
प्रसभंदैत्यंरणायाह्वयतेस्मतं॥६८॥सोप्युत्क्षिप्यकरंवामंमौनस्थस्तस्यभूभृतः॥प्रतीक्षस्वक्षणंतावदितिसं
ज्ञांतदाकरोत्॥६९॥राजापिलघुहस्तत्वात्करेतत्रैवतत्क्षणं॥तस्मिन्मर्मणितंदैत्यंपृषत्केनजघानसः॥७१॥स
चमर्माहतंघोरंरावंकृत्वामहासुरः॥अंगारकोपतद्भूमौनिर्यज्जीवोजगादच॥७१॥तृषितोहंहतोयेनसम्यग

क. क.

द्भिर्न तर्पयेत्॥ प्रत्यहं यदि तत्तस्य नश्येयुः पंच मंत्रिणः॥७२॥ इत्युक्त्वा पंच तां प्राप स दैत्यस्सोपि तत्सुतां॥ नामंगा
रवतीं राजा गृहीत्वोज्जयिनीं ययौ॥७३॥ परिणीतवनस्तस्य तत्र नां दैत्यकन्यकां॥ एतौ द्वौ तनयौ चंडमहासेनस्य

१४

भूपतेः॥७४॥ एको गोपालको नाम द्वितीयः पालकस्तथा॥ तयोरिंद्रोत्सवं चासौ जातयोरकरोन्नृपः॥७५॥ ततस्तं
नृपतिं स्वप्ने तुष्टो वक्ति स्म वासवः॥ प्राप्स्यस्यनन्यसदृशीं मत्प्रसादात्सुतामिति॥७६॥ ततः कालेन जातास्य राज्ञः
कन्यानुतप्यया॥ अपूर्वनिर्मिता धात्रा चंद्रस्येवापरा तनुः॥७७॥ कामदेवावतारोस्याः पुत्रो विद्याधराधिप॥
भविष्यतीति तत्कालमुदभूद्भारती दिवः॥७८॥ दत्तामेवासवेनैव तुष्टेनेति स भूपतिः॥ स किल देवनत्राक्यो जेतुय

८१

थात थादुर्गदेत्रास्यः॥ + नाम्ना वासवदत्तां तां तनयामकरोत्तदा॥७९॥ सा च तस्य पितुर्गेहे प्रदेयासंप्रतिस्थिता॥
प्राङ्मंथोदर्णवस्येव कमला कुक्षिकोटरे॥८०॥ एवंविधिप्रभावश्चंडमहासेनभूपतिः॥ + किंच स वांछतिदा
तुं तुभ्यं स दैवतनयां तां॥ प्रार्थयते तु स राजा निजपक्षमहोयमानी॥८१॥ सा चावश्यं मन्ये वासवदत्ता त्वयैव परिणे

१५

या॥ स सपदि वासवदत्ताहृतहृदयो वत्सराजोभूत्॥८२॥ इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे कथामु
खलंबके तृतीयस्तरंगः॥३॥ आदितः॥११॥ अत्रांतरे स वत्सेशं प्रति दूतस्तदब्रवीत्॥ गत्वा प्रतिवचश्चंडमहासेना

यभूभृते॥१॥सोपिचंडमहासेनस्तछ्रुत्वैवंव्यचिंतयत्॥सतावदिहनायातिमानीवत्सेश्वरोभृशं॥२॥कन्याहितत्र
नप्रेष्याभवेदेवंहिलाघवं॥तस्माद्बुद्ध्यैवतंयुक्त्यानृपमानाययाम्यहं॥३॥इतिसंमंत्र्यसंचिंत्यसराजामंत्रिभिःसह॥आ
कारयत्स्वसदृशंमहांतंयंत्रहस्तिनं॥४॥तंचांतर्वीरपुरुषैःकृत्वाछन्नैरधिष्ठितं॥विंध्याटव्यांचनिदधेराजायंत्रमयंग
जं॥५॥तत्रतंचारपुरुषाःपश्यंतिस्मविदूरतः॥गजबंधरसासक्तवत्सराज्योपजीविनः॥६॥तेचत्वरितमागसव
त्सराजंव्यजिज्ञपन्॥देवदृष्टोगजोस्माभिरेकोविंध्यवनेभ्रमन्॥७॥अस्मिन्नियतिभूलोकेनैवयोन्यत्रदृश्यते॥
वर्ष्मणाव्याप्तगगनोविंध्याद्रिरिवजंगमः॥८॥एतच्चारवचःश्रुत्वावत्सराजोजहर्षसः॥तेभ्यःसुवर्णलक्षंच
प्रददौपारितोषकं॥९॥तंचेद्गजेंद्रंप्राप्नोमिप्रतिमल्लंनडागिरेः॥तत्सचंडमहासेनोवश्योभवतिमेध्रुवं॥१०॥त
तोवासवदत्तांचसस्वयंमेप्रयच्छति॥इतिसंचिंतयन्सोथराजातामनयन्निशां॥११॥प्रातश्चमंत्रिवचनंन्य
कृत्वागजतृष्णया॥पुरस्कृत्यैवतांश्चारान्ययौविंध्याटवींप्रति॥१२॥प्रस्थानलग्नस्यफलंकन्यालाभंसबंधनं॥
यदूचुर्गणकास्तस्यतत्सनैवव्यचारयत्॥१३॥प्राप्यविंध्याटवींतस्यगजस्यक्षोभशंकया॥वत्सराजःस्वसैन्यानि
दूरादेवन्यवारयत्॥१४॥चारमात्रसहायस्तुवीणांघोषवतींदधत्॥निजव्यसनविस्तीर्णांतांविवेशमहाटवीं॥१५॥

विंध्यस्य दक्षिणे पार्श्वे दूराच्चारैः प्रदर्शितं गजमन्यगजाभासं तं ददर्श स भूपतिः ॥१६॥ एकाकी वादयन्वीणां चिं-
तयन्बंधनानि सः ॥ मधुरध्वनिगायंश्च शनैरुपजगाम तं ॥१७॥ गांधर्वदत्तचित्तत्वात्संध्याध्वांतवशाच्च सः ॥
न तं वनगजं राजा मायागजमलक्षयत् ॥१८॥ सोपि हस्ती तमुत्कीर्णनालोगीनरसादिव ॥ उपेत्योयस्य विच-
लन्दूरमारूरवान्नृपं ॥१९॥ ततोकस्माच्च निर्गत्य ततो यंत्रमयाद्गजात् ॥ वत्सेश्वरं तं सन्नद्धाः पुरुषाः पर्य-
वारयन् ॥२०॥ न दृष्ट्वान्नृपतिः कोपादाकृष्टक्षुरिकोऽथ सः ॥ अयस्थान्योधयन्नन्यैरेत्य पश्चादग्रस्तन ॥२१॥
संकेतमिलितैश्चान्यैर्योधास्तैः सैनिकैः सह ॥ निन्युर्वत्सेश्वरं चंडमहासेनांतिकं च तम् ॥२२॥ सोपि चंडमहा-
सेनो निर्गत्याग्रे कृतादरः ॥ वत्सेशेन समं तेन विवेशोज्जयिनीं पुरीं ॥२३॥ स तत्र ददृशे पौरैरवमानकलंकितः ॥
राशीव नयनानंदो वत्सराजो नवागतः ॥२४॥ ततोस्य गुणरागेण वधमाशंक्य तत्र ते ॥ पौराः संभूय सकला-
श्चक्रुर्मरणनिश्चयं ॥२५॥ न मे वत्सेश्वरो वध्यः संधेय इति तान्ब्रुवन् ॥ सोथ चंडमहासेनः पौरान्क्षो-
भाद्वारयत् ॥२६॥ ततो वासवदत्तां तां सुतां तत्रैव भूपतिः ॥ वत्सराजाय गांधर्वशिक्षाहेतोः समर्पयत् ॥२७॥
उवाच चैनं गांधर्वं त्वमेनां शिक्षय प्रभो ॥ ततः प्राप्स्यसि कल्याणं मा विषादं कृथा इति ॥२८॥ तत्र दृष्ट्वा तु तां

कांतां वत्सराजस्य मानसं ॥ तथास्नेहाकुलमभून्न यथामन्युमैक्षत ॥ तस्याश्च चक्षुर्मनसी सहतं प्रतिजग्मतुः ॥
ह्रिया चक्षुस्त्रिवरते मनस्तु न कथंचन ॥३०॥ अथ वासवदत्तां तां गाययंस्तत्कृतेक्षणः ॥ तत्र गांधर्वशालायां
वत्सराज उवास सः ॥३१॥ अंके घोषवती तस्य कंठे श्रीतश्रुतिस्तथा ॥ पुरो वासवदत्ता च तस्थौ चेतो विनोदि
नी ॥३२॥ सापि वासवदत्तास्य परिचर्यापराभवत् ॥ लक्ष्मीरिव तदेकाग्र वद्धस्याप्यनपायिनि ॥३३॥ अत्रांतरे च
कौशांब्यां वत्सराजानुगे जने ॥ आरत्ते तं प्रभुं बुध्वा वद्धं राष्ट्रं च चुक्षुभे ॥३४॥ उज्जयिन्यामवस्कंदं दातुमैच्छत्स
मं ततः ॥ वत्सेश्वरोनुरागेण क्रुद्धा प्रकृतयस्तदा ॥३५॥ नैव चंडमहासेनो बलसाध्यो महान्हि सः ॥ न चैवं वत्स
राजस्य शरीरे कुशलं भवेत् ॥३६॥ तस्मान्न युक्तोवस्कंदो बुद्धिसाध्यमिदं पुनः ॥ इति प्रकृतयः क्षोभान्रुमवार्यं
तहमन्वता ॥३७॥ ततोनुरक्तमालोक्य राष्ट्रमव्यभिचारितं ॥ रुमस्तदादीनाहस्म मंत्री यौगंधरायणः ॥३८॥ इहै
व सर्वैर्युष्माभिः स्थीयते सततोद्यतैः ॥ रक्षणीयमिदं राष्ट्रं काले कार्यश्च विक्रमः ॥३९॥ वसंतकद्वितीयस्तं ग
त्वाहं प्रज्ञया स्वया ॥ वत्सेशं मोचयित्वात मानयामि न संशयः ॥४०॥ जलाहुतौ विशेषेण वैद्युताग्नेरिव द्यु
तिः ॥ आपदि स्फुरति प्रज्ञा यस्य धीरः स एव हि ॥४१॥ प्राकारभंजनान्योगांस्तथा निगडभंजनात् ॥ अदर्शनप्रयोगां

ब्र·क·

श्च जानेहमुपयोगिनः॥४२॥ इत्युक्त्वा प्रकृतीः कृत्वा हस्तन्यस्ता रुमण्वतः॥ यौगंधरायणः प्रायात्क्रोशांत्याः स वसं
तकः॥४३॥ प्रविवेश च तेनैव सह विंध्यमहाटवीं॥ स्वप्रज्ञामिव सत्वाढ्यां स्वनीतिमिव दुर्गमां॥४४॥ तत्र वत्सेश

१६

मित्रस्य विंध्यप्राग्भारवासिनः॥ गृहं पुलिंदकाख्यस्य पुलिंदाधिपतेरगात्॥४५॥ तं सज्जं स्थापयित्वा तु य
याने नागमिष्यतः॥ वत्सराजस्य रक्षार्थं भूरिसैन्यसमन्वितं॥४६॥ गत्वा वसंतकसखस्ततो यौगंधरायणः॥
उज्जयिन्यां महाकालश्मशानं प्रायसे क्रमात्॥४७॥ विवेश तत्र वेतालैः कव्यगंधिभिरावृतं॥ दूनस्तनतमः
रूपा मेघैरिवापरैः॥४८॥ तत्रैनं दर्शनप्रीतो मित्रभावाय तत्क्षणं॥ योगीश्वराख्यो वृतवानुपेत्य ब्रह्म
राक्षसः॥४९॥ तेनोपदिष्टया युक्त्या ततो यौगंधरायणः॥ स चकात्मनः सद्योरूपस्य परिवर्त्तनं॥५०॥ बभू
व तेन विकृतः कुब्जो वृद्धश्च तत्क्षणात्॥ उन्मत्तवेशः खल्वाटो हास्यसंजननः परं॥५१॥ तयैव युक्त्या स तदा
सिरावद्धं पृथूदरं॥ चक्रे वसंतकस्यापि रूपं दंतुरदुर्मुखं॥५२॥ ततो राजकुलद्वारमादौ प्रेष्य वसंतकं॥ विवे
शोज्जयिनीं तां स तादृग्यौगंधरायणः॥५३॥ नृत्यन्गायंश्च तत्रासौ बहुभिः परिवारितः॥ दृष्टः सकौतुकं
सर्वैर्ययौ राजगृहं प्रति॥५४॥ तत्र राजावरोधानां तेनासौ कृतकौतुकः॥ अगाद्वासवदत्तायाः शनैः श्रवण

१६

गोचरं ॥५५॥ सा तमानाययामास चेटिकां प्रेष्य सत्वरं ॥ गंधर्वशालानमैकसोदरं हि नवं वयः ॥५६॥ सचत
त्रागतो वद्धं वत्सराजं ददर्शनं ॥ उन्मत्तवेषो विगलद्बाष्पो यौगंधरायणः ॥५७॥ चकार संज्ञां तस्मै स वत्सरा
जाय सोपितं ॥ प्रसभिज्ञानवान् राजा वेशप्रछन्नमागतं ॥५८॥ ततो वासवदत्तां च तच्चेटीः प्रति चात्मनः ॥
अदर्शनं युक्तिबलाद्व्याधाद्यौगंधरायणः ॥५९॥ राजा त्वेको ददर्शैनं ताश्च सर्वाः सविस्मयं ॥ वदंति स्म गतो
कस्मादुन्मत्तः क्वाप्यसाविति ॥६०॥ तच्छ्रुत्वा तं च दृष्ट्वाग्रे मत्वा योगबलेन तत् ॥ युक्त्या वासवदत्तां तां वत्स
राजोब्रवीदिदं ॥६१॥ गत्वा सारस्वतीं पूजामादायागच्छ दारिके ॥ तच्छ्रुत्वा सा तथेत्युक्त्वा सवयस्या विनिर्ययौ
॥६२॥ यथोचिनमुपेत्याथ ददौ वत्सेश्वराय सः ॥ यौगंधरायणस्तस्मै योगान्निगडभंजनात् ॥६३॥ अन्यान्वा
सवदत्ताया वीणातंत्रीनियोजितान् ॥ वशीकरणयोगांश्च राज्ञेस्मै समर्पयत् ॥६४॥ व्यजिज्ञपच्च तं रा
जन्निहायातो वसंतकः ॥ द्वारस्थितोन्यरूपेण तं कुरुष्वांतिके द्विजं ॥६५॥ यदा वासवदत्तेयं तव विश्रंभमेष्य
ति ॥ तदा वक्ष्यामि यदहं कुर्यां तत्तिष्ठ संप्रति ॥६६॥ इत्युक्त्वा निर्ययौ शीघ्रं ततो यौगंधरायणः ॥ आगाद्वास
वदत्ता च पूजामादाय तत्क्षणं ॥६७॥ सोथ तामवदद्राजा बहिर्द्वारि द्विजस्थितः ॥ सरस्वत्यर्चने सोस्मिन्दक्षि

णार्थे प्रवेश्यतां ॥६८॥ तथेति द्वारदेशात्स तत्र वासवदत्तया ॥ विरूपामाकृतिं बिभ्रदाह्वायत वसंतकः ॥६९॥
स चानीतस्तमालोक्य वत्सेशामरुदच्छुचा ॥ ततश्चाप्रतिभेदाय स राजा निजगाद तं ॥७०॥ हे ब्रह्मन् रोग वैरूप्यं सर्व
मेतदहं तव ॥ निवारयामि मारोदीस्तिष्ठ चेह ममांतिके ॥७१॥ महान्प्रसादो देवेति स चोवाच वसंतकः ॥ हसति स्मा
धिकोद्भूत विकृताननविक्रियः ॥७२॥ तं हसंतं तथा दृष्ट्वा क्रीडनीयकसन्निभं ॥ तत्र वासवदत्तापि जहास च तुतो
ष च ॥७३॥ ततः नर्मणा बाला तं पप्रच्छ वसंतकं ॥ किं विज्ञानं विजानासि भो ब्रह्मन् कथ्यतामिति ॥७४॥ क
थाः कथयितुं देवि जानामीति स चावदत् ॥ कथां कथय तर्ह्येकामिति सापि ततोब्रवीत् ॥७५॥ ततस्तां राजतन
यां रंजयन्स वसंतकः ॥ हासवैचित्र्यसरसामवर्णयदिमां कथां ॥७६॥ अस्तीह मथुरा नाम पुरी कंसारिजन्म
भूः ॥ तस्यां रूपणिकेत्यासीत्ख्याता वारविलासि ॥७७॥ तस्या मकरदंष्ट्राख्या माताभूद्वृद्धकुट्टनी ॥ तद्गुणा
कृष्यमाणानां यूनां दृष्टिविषच्छटा ॥७८॥ पूजाकाले सुरकुलं स्वनियोगाय जातु सा ॥ गत्वा रूपणिका दूरादेकं
पुरुषमैक्षत ॥७९॥ स दृष्टः सुभगस्तस्या विवेश हृदयं तथा ॥ यथा मातृकृतास्तस्मादुपदेशा विनिर्ययुः ॥८०
चेटिकामवदत्साथ गच्छ मद्वचनादमुं ॥ पुरुषं ब्रूहि मद्गेहे त्वयाद्यागम्यतामिति ॥८१॥ तथेति चेटिका साथ

गत्वा तस्मै तदब्रवीत्॥ ततः स किंचिद्विमनाः पुरुषस्तामभाषत॥८२॥ लोहजंघाभिधानोऽस्मि ब्राह्मणो नास्ति मे धनं॥ तदाप्यजनलभ्ये हि कोऽहं रूपणिकागृहे॥८३॥ न धनं वांछ्यते त्वत्तः स्वामिन्नित्युदिते तया॥ स लोहजंघस्तद्वाक्यं तथेति प्रत्यपद्यत॥८४॥ ततश्चेटीमुखाद्बुध्वा तच्च सा गृहमुत्सुका॥ गत्वा रूपणिका तस्थौ तन्मार्गन्यस्तलोचना॥८५॥ क्षणाच्च लोहजंघोऽथ तस्या मंदिरमाययौ॥ कुतोऽयमिति कुट्टन्या दृष्टो मकरदंष्ट्रया॥८६॥ सापि रूपणिका दृष्ट्वा स्वयमुत्थाय सादरा॥ वासवेश्मांतरं हृष्टा कंठालग्ना निनाय तं॥८७॥ ततः सा लोहजंघस्य तस्य सौभाग्यसंपदा॥ वशीकृतासीत्तन्नान्यत्फलं जन्मन्यमन्यत॥८८॥ ततस्तया निवृत्तान्यपुरुषासंगया सह॥ यथासुखं स तत्रैव रेमे तन्मंदिरे युवा॥८९॥ तद्दृष्ट्वा शिक्षिताशेषवेश्यायोषिज्जगाद तां॥ माता मकरदंष्ट्रा सा खिन्ना रूपणिकां रहः॥९०॥ किमयं निर्धनः पुत्रि सेव्यते पुरुषस्त्वया॥ शवं स्पृशंति स्वजना गणिका न तु निर्धनं॥९१॥ क्वानुरागः क्व वेश्यात्वमिति ते विस्मृतं कथं॥ संध्येव रागिणी वेश्या न चिरं पुत्रि दीप्यते॥९२॥ नटीव कृत्रिमं प्रेम गणिकार्थाय दर्शयेत्॥ तदेनं निर्धनं मुंच मा कृथा नाशमात्मनः॥९३॥ इति मातुर्वचः श्रुत्वा रुषा रूपणिकाब्रवीत्॥ मैवं वादीर्मम ह्येष प्राणेभ्योऽप्यधिकः प्रियः॥

बृ॰क॰

९४॥धनमस्तिचमेभूरि किमन्येनकरोम्यहं॥नदंबनैवदवक्तव्याभूयोप्येवमहंत्वया॥९५॥तच्छ्रुत्वालोहजंघस्य

निर्वासनविधौक्रुधा॥तस्यौमकरदंष्ट्रासातस्योपायंविचिन्वती॥९६॥अथमार्गगतं॥कंचितक्षीणकोशंदद

१८

र्शसा॥राजपुत्रंपरिवृतंपुरुषैःशस्त्रपाणिभिः॥९७॥उपगम्यद्रुतंतंचनीत्वैकांतेजगादसा॥निर्द्धनेनममैके

नकामुकेनावृतंगृहं॥९८॥तत्वमागच्छतच्चापतथाचकुरुयेनसः॥गृहान्ममनिवर्त्तेतमदीयांचसुतांभज॥९९॥

तथेतिराजपुत्रोथप्रविवेशसतद्गृहं॥तस्मिन्क्षणेरूपणिकातस्थौदेवकुलेचसा॥१००॥लोहजंघश्चतत्कालंब

हिःक्वापिस्थितोभवत्॥क्षणांतरेचनिःशंकस्तत्रैवसमुपाययौ॥१॥ततक्षणंराजपुत्रस्यतस्यभृत्याःप्रधाव्य

सः॥दृढंपादप्रहाराद्यैःसर्वेष्वंगेष्वताडयन्॥२॥ततस्तैरेवचामेध्यपूर्णेक्षिप्तःसखातके॥लोहजंघःकथम

पिप्रपलायितवांस्ततः॥३॥अथागतारूपणिकातद्बुध्वाशोकविह्वला॥साभूद्वीक्ष्याथप्रययौराजपुत्रोयथागतं॥४॥

लोहजंघोतिकुट्टन्याप्रसह्यसस्वलीकृतः॥गंतुंयुववृतेतीर्थेप्राणांस्त्यक्तुंवियोगवान्॥५॥गच्छन्नटव्यांसंतप्तः

कुट्टनीमन्युनाहृदि॥क्वचिच्चग्रीष्मतापेनछायामभिललाषसः॥६॥तरूमप्राप्तवान्सोथलेभेहस्तिकलेवरं॥ १८

जघनेनप्रविश्यांतर्निर्मांसंजंबुकैःकृतं॥७॥चर्मावशेषेतत्रांतःपरिश्रांतःप्रविश्यसः॥लोहजंघोययौनिद्रांप्रा

विशद्घानशीनले ॥८॥ अथकस्मात्समुत्थायक्षणेनैवसमंततः ॥ मेघः प्रवरनेनत्रधाराऽसारेणवार्षितुं ॥९॥ तेननि
र्विवरंप्रापसंकोचंहस्तिचर्मनत् ॥ क्षणान्तेनचमार्गेणजलौघोभ्रंशमाययौ ॥१०॥ तेनापद्रुत्सगंगाग्यामक्षेपिगज
चर्मनत् ॥ तज्जलौघेनहृत्वाचसमुद्रांतन्येधीयत ॥११॥ तत्रदृष्ट्वाचतच्चर्मनियत्सामिषशंकया ॥ हृत्वाब्धेःपार
मनयत्पक्षीगरुडवंशजः ॥१२॥ तत्रचंचुविदार्यैतद्गजचर्मविलोक्यच ॥ अंतस्थमानुषंपक्षीपलाय्यसततोभ्य
यौ ॥१३॥ ततस्तच्चर्मणस्तस्मात्सपक्षिसंरंभबोधितः ॥ तच्चंचुरचितद्वारात्लोहजंघोविनिर्ययौ ॥१४॥ दृष्ट्वासमुद्रपार
स्थमात्मानंचसविस्मयः ॥ अनिद्रमिवतत्स्वप्नंससमग्रममन्यत ॥१५॥ अथद्वौराक्षसौतत्रघोरौभीतौददर्शसः ॥
तौचापिराक्षसौदूराच्चकितौतमपश्यतां ॥१६॥ रामात्सराभवंस्मरत्वानंनथैवचमानुषं ॥ दृष्ट्वातीरगंबुधिंभूयस्तौ
भयंहृदिचक्रतुः ॥१७॥ संमंत्र्यचतयोर्मध्यादेकोगत्वानथैवतं ॥ विभीषणायप्रभवेयथावृत्तंन्यवेदयत् ॥१८॥
दृष्टरामप्रभावःसनृसोपिराजाविभीषणः ॥ मानुषागमनाद्भीतोराक्षसंतमभाषत ॥१९॥ गच्छमद्वचनाद्भद्र
प्रीत्यानद्रूहिमानुषं ॥ आगम्यतांगृहेस्माकंप्रसादःक्रियतामिति ॥२०॥ तथेत्यागत्यतत्तस्मैस्वप्रभुप्रार्थनावचः ॥
जं चकितोलोहघायशशंसचराक्षसः ॥२१॥ सोप्यंगीकृत्यलोहजंघःप्रशांतधीः ॥ तेनैवसद्वितीयेनसहलंकांततो

तद्विप्रा

ययौ ॥२२॥ तस्यां चंद्रशसौवर्णतन्तत्प्रासाद विस्मितः ॥ प्रविश्य राजसदनं स ददर्श विभीषणं ॥ ॥२३॥ दृष्ट्वाशिषा
भिनंद्यैवमुवाच च विभीषणम् ॥ सोपि प्रप्रच्छ राजा ज्ञातं कृतातिथ्यः कृताशिषः ॥ ब्रह्मन् कुत इमां भूमिं अनुप्राप्तो
भवानिति ॥ ततः स धूर्त्तो वादीत्तं लोहजंघो विभीषणं ॥ विप्रो हं लोहजंघाख्यो मथुरायां कृतस्थितिः ॥२४॥ सोहं दा
त्र रिद्र्यसंतप्तस्त्वं नारायणाग्रतः ॥ निराहारः स्थितो कार्षं गत्वा देवकुले तपः ॥२५॥ विभीषणांतिकं गच्छ मद्भक्तः स हि तेध
नं ॥ दास्यतीत्यादिदेश त्वं प्रेत तो मां भगवान्हरिः ॥२६॥ क्वाहं विभीषणः क्वेति मयोक्ते स पुनः प्रभुः ॥ समादिशद्व्र
जद्यैव तं द्रक्ष्यसि विभीषणं ॥२७॥ इत्युक्तः प्रभुणा सद्यः प्रबुद्धो हमिहांबुधेः ॥ पारे वस्थितमात्मानमपश्यं वेद्मि
नापरं ॥२८॥ इत्युक्तो लोहजंघेन लंकामालोक्य दुर्गमां ॥ ससंदिव्यप्रभावोयं इति मेने विभीषणः ॥२९॥ तिष्ठ दा
स्यामि ते वित्तमित्युक्त्वा ब्राह्मणं च तं ॥ ज्ञात्वाथ रक्षरां हस्ते तमप्रेष्यं न्यघातिनां ॥३०॥ तत्रस्थान्वर्णभूलाख्याद्रि
रेः संप्रेष्य सा राक्षसान् ॥ आनाययत्स क्षिप्रोतं गरुडान्वयसंभवं ॥३१॥ तं चास्मै लोहजंघाय मथुरायां गमिष्य
ते ॥ तत्कालमेव प्रददौ वशीकाराय वाहनं ॥३२॥ लोहजंघोपि लंकायां वाहयन्नधिरूढ तं ॥ कंचित्कालं विशश्रा
मस विभीषणसत्कृतः ॥३३॥ एकदा तं च पप्रच्छ राक्षसेंद्रं सकौतुकः ॥ लंकायां काष्ठमप्येषां कस्मात्सर्वैव भूरिति ॥३४॥

तछ्रुत्वासचतद्वृत्तंतमुवाचविभीषणः॥यदितेकौतुकंवत्सलंस्तदिदंश्रृणुवच्मिते॥३५॥पुराप्रतिज्ञोपनतांनागा
नांदासभावतः॥निष्क्रष्टुकामोजननींगरुडःकश्यपात्मजः॥३६॥उन्मूल्यभूतांदेवेभ्यःसुधामाहर्तुमुद्यतः॥
बलस्यहेतोर्भक्ष्यार्थीस्वपितुर्निकटंययौ॥३७॥सचैनंयाचितोवादीन्महान्तौगजकच्छपौ॥अद्यौस्ततत्रतौ
गत्वाभुंक्ष्वचाशापच्युताविति॥३८॥ततःसगरुडोगत्वाभक्ष्यावादायतावुभौ॥महतःकल्पवृक्षस्यशाखायां
समुपाविशत्॥३९॥तांचशाखांभरात्सद्योभग्नांचंच्वावभारसः॥अधःस्थिततपोनिष्ठवालखिल्यानु
रोधतः॥४०॥लोकोपमर्दभीतेनततेनाथपितुराज्ञया॥आनीयविजनेस्थत्क्तासाशाखाविहगरुत्मता॥४१॥त
स्याःपृष्ठेकृतालंकातेनकाष्ठमयीहभूः॥एतद्विभीषणाछ्रुत्वालोहजंघस्ततोषसः॥४२॥ततस्तस्मैम
हार्घाणिरत्नानिसुबहूनिच॥विभीषणोददातिस्ममथुरांगंतुमिच्छते॥४३॥भक्त्याथदेवस्यहरेर्मथुराव
र्तिनःकृते॥हस्तेस्यैवगदाशार्ङ्गचक्रान्हेममयान्ददौ॥४४॥तद्गृहीत्वाखिलंतस्मिन्विभीषणसमर्पिते॥
आरुह्यविहगेलक्ष्ययोजनानांप्रयातरि॥४५॥उत्पत्यव्योममार्गेणलंकायास्तीर्णवारिधिः॥सलोहजंघो
मथुरामक्लेशेनाजगामतां॥४६॥तस्यांश्रून्येविहारेचबाल्येव्योम्नोवतीर्यसः॥स्थापयामासरत्नौघंतंवधं

ब.क. २०

धसपक्षिणं ॥४७॥ आपणे रत्नमेकं च गत्वा विक्रीतवांस्ततः ॥ अथ वस्त्रांगरागादि क्रीतवान् भोजनं त
था ॥४८॥ तद्विहारे च तत्रैव भुक्त्वा दत्वा च पक्षिणे ॥ वस्त्रांगरागभूषाद्यै रात्मानं तैरभूषयत् ॥४९॥ प्रदोषे
च ययौ तस्यास्तत्रैवारूढपक्षिणि ॥ गृहं रूपणिकायास्ताः शंखचक्रगदावहन् ॥५०॥ तत्रोपरि ततः स्थि
तास्थानविरवेचर श्वसः ॥ शंखं चकार गंभीरं रहस्तां श्रावयन् प्रियां ॥५१॥ तं च श्रुत्वैव निर्याता सा पद्मय
द्रलराजितं ॥ एकं नारायणाकल्पं व्योम्नि रूपणिका निशि ॥५२॥ अहं हरिरिहायातस्त्वदर्थे मिति तेन सा ॥
उक्ता प्रणम्य वक्तिस्मदयां देवः करोत्विति ॥५३॥ अथावतीर्य संयम्य लोहजंघो विहंगमं ॥ विवेशावासक्षव
नं सत याकांतया सह ॥५४॥ तत्र संप्राप्तसंभोगः स निष्क्रम्य क्षणांतरे ॥ तथैव विहगारूढो जगाम नभसा
ततः ॥५५॥ देवताविष्णुभार्याहं मर्त्यैः सह न भाषये ॥ इति रूपणिकाप्रातस्तस्थौ मौनं विधाय सा ॥५६॥ क
स्मादेवं विधा पुत्रि वर्त्तसे कथ्यतां त्वया ॥ इत्यपृच्छत सा माता ततो मकरदंष्ट्रया ॥५७॥ निर्बंधपृष्टा तस्यै च सा
मात्रे मौनकारणं ॥ शशंस रात्रिवृत्तांतं दापयित्वांतरे पटं ॥५८॥ सा तच्छ्रुत्वा ससंदेहा स्वयं तं कुट्टनी निशि
॥ ददर्श विहगारूढं लोहजंघं तदागतं ॥५९॥ तत्र स्थितालोहजंघः सुखं भुक्त्वा न तोययौ ॥ प्रभाते च पटांत

२०

स्यामेसरूपणिकारहः ॥६०॥ प्रह्वा मकरदंष्ट्रासा कुट्टनीति व्यजिज्ञपत् ॥ देवस्यानुग्रहात्सुत्रि त्वं देवित्वमुपा
गता ॥६१॥ अहं च तत्र जननी तन्मे देहि सुकृताफलं ॥ वृद्धानेनैव देहेन यथा स्वर्गं व्रजाम्यहं ॥६२॥ तया देवस्य वि
ज्ञप्तिं कुरुष्वानुग्रहाण मां ॥ तथेति सा रूपणिका तमेवार्थं व्यजिज्ञपत् ॥६३॥ व्याजविष्णुपुनर्नेकं लोहजंघ
मुपागमत् ॥ ततः स देववेशस्तां लोहजंघो ब्रवीत्प्रियां ॥६४॥ पापा नेजननी स्वर्गं व्यक्तं नेतुं न युज्यते ॥ ए
कादश्यां पुनः प्रातर्द्वारमुक्तं घटते दिवः ॥६५॥ तत्र च प्रविशंसग्रेव हवः शांभवा गणाः ॥ तन्मध्येऽस्य तनहृ
ज्ञात्वन्मातासौ प्रवेश्यते ॥६६॥ तदस्याः पंच चूडत्वं क्षुरक्लिप्तं शिरः कुरु ॥ कंठकरंकमालाढ्यं पार्श्वे चैकं
सकज्जलं ॥६७॥ अन्यत्सिंदूरलिप्तं च कुर्वे स्यावीतवाससः ॥ एवं ह्येनां गणाकारां सुखं स्वर्गं नयाम्यहं ॥६८॥
इत्युक्त्वा सक्षणं स्थित्वा लोहजंघस्ततो गमत् ॥ प्रातश्च सा रूपणिका यथोक्तं तमकारयत् ॥६९॥ वेशं मातुरथै
वापि तस्यौ स्वर्गैकसंमुखी ॥ आययौ च पुनस्तत्र लोहजंघो निशागमे ॥७०॥ सा च रूपणिका तस्मै मातरं
स्वां समर्पयत् ॥ ततः स विहगारूढस्तामादायैव कुट्टनीं ॥७१॥ नग्नां विकृतवेशां च जवादुदयतन्नभः ॥
गगनस्थः स तत्रैव प्राप्त देवकुलाग्रतः ॥७२॥ सद्दर्श शिलास्तंभं चक्रेणोपरिलांछितं ॥ तस्य पृष्ठे सच क्रैक

मालंभे तांन्य वेश्रायत् ॥७३॥ खल्लीकार प्रतीकार पताका मिव कुट्टनी ॥ इह क्षणं तिष्ठ यावत्सान्निध्यानुग्रहं
भुवि ॥७४॥ गत्वा करोमीत्युक्त्वाच तस्या दृष्टिपथाद्ययौ ॥ ततस्तत्रैव देवाग्रे निशि जागरणागतान् ॥७५॥ रात्रौ या
त्रोत्सवे ऽत्रोत्सवे लोकानागतादेवमब्रवीत् ॥ हे लोका इह युष्माकमुपर्येष पतिष्यति ॥७६॥ सर्व संहारिणी मा
री तद्देनगर रणं हरिं ॥ श्रुत्वैतत्फगना द्वाणी भीताः सर्वे पि नगते ॥७७॥ मथुरा देवमाश्रित्य तस्थुः स्वस्त्ययनो
द्यताः ॥ सोपि व्योम्नावतीर्येव लोहजंघो विलोकयत् ॥७८॥ तस्या वदद्दस्त स्तन्मध्ये देववेश्मं निवार्य तं ॥ अद्यापि
नागतो देवो न च स्वर्गमहं गता ॥७९॥ इति चस्तं वपृष्ठस्था कुट्टन्येवमचिंतयत् ॥ अक्षमेवोपरिस्थातुं श्रावयं निज
नानधः ॥८०॥ हा हाहं पतितास्मीति सा च क्रंदच बिभ्यती ॥ तछ्रुत्वा पतितासेयं मारीत्याशंक्य चातुराः ॥८१॥ देवि
मामापतेत्यूचुस्ते देवाग्रगता जनाः ॥ ततः सबालवृद्धास्ते मथुरास्तां विभावरीम् ॥८२॥ मारीपातभयोद्भ्रांता कथ
मप्यसवाहयन् ॥ प्रातश्च ददृषास्तंभस्थां कुट्टनीं तां तथाविधां ॥८३॥ प्रत्यभिज्ञातवान् सर्वः पौरलोकः सराजकः ॥
अतिक्रांतभये जाते जातहास्यैरविलेगते ॥८४॥ आययौ श्रुतवृत्तांतां तत्र रूपणिका थ सा ॥ सा च ददृश्वा स चैल
क्ष्यास्तंभाग्राज्जननीं निजां ॥८५॥ तामावतारयत्सघस्तत्रस्थैस्तैर्जनैः सह ॥ ततः सा कुट्टनी तत्र सर्वैस्तैः सकु

तूरूलैः॥८६॥आपृछतयथावृत्तं सापितृभ्यः शशंसतत्॥ततः सिद्धादिचरितं तन्मत्वाद्भुतहासितं॥८७॥सराजवि
प्रावणिजो जनास्ते वास्यमब्रुवन्॥येनेयं विप्रलब्धा हि वंचितानेककामुकाः॥८८॥प्रकारः सोस्त्तस्येह पदवंधो
विधीयते॥तछ्रुत्वा लोहजंघस्तत्रात्मानमदर्शयत्॥८९॥पृष्टश्चामूलतः सर्ववृत्तांतं तमवर्णयत्॥ददौ तस्मात्र
देवायच्छांखचक्राद्युपायनं॥९०॥विभीषणेन प्रहितं जनविस्मयवर्द्धनं॥अथ तस्य सपदि पदं वध्वा संतुष्य माथुराः
सर्वे स्वाधीनारूपणिकां राजादेशेन ता चक्रुः॥९१॥ततश्च तत्र प्रियया समं सदा समृद्धकोशो बहुरत्नसंचयैः॥स
लोहजंघः प्रतिरूपकुट्टनीनिकारमस्तुन्यवसद्यथासुखं॥९२॥दूस्यन्यरूपस्य वसंतकस्य मुखात्समाकर्ण्य कथाम
वापि॥बद्धस्य वत्साधिपतेः समीपे तोषः परो वासवदत्तयांतः॥९३॥ ॥इति श्रीसोमदेवविरचिते कथासरित्सागरे
कथामुखलंबके लोहजंघकथा नाम चतुर्थस्तरंगः॥४॥आदितो द्वादशः॥१२॥अथ वासवदत्ता सा शनैर्वत्सेश्वरं प्र
ति गाढवद्धभावाभूत्पितृपक्षपराङ्मुखी॥१॥ततो वत्सेशनिकटं पुनर्यौगंधरायणः॥विवेशादर्शनं कृत्वा स
र्वानन्यान्जनान्प्रति॥२॥वसंतकसमक्षं च विजने तं व्यजिज्ञपत्॥राजन्बद्धो भवांश्चंडमहासेनेन मायया॥३॥सु
तां च दत्वा संमान्य त्वामयं मोक्तुमिछति॥तदस्यैनां स्वयं हृत्वा गछामस्तनयां ध्रुवं॥४॥एवं ह्यस्य प्रतीकारो हृ

बृ·कः

२२

पस्य विहितो भवेत्॥ अपौरुषहृतं लोके नैव स्याच्छ्लाघ्यं च नः॥५॥ अस्ति चैनेनेनदत्तास्यास्तनयायाः करेणुका॥
राज्ञो वासवदत्ताया नाम्ना भद्रवतीन्नृप॥६॥ स चानुगंतुं वेगेन शक्या नान्येन दंतिना॥ मुक्त्वा नडागिरिं सोपि
तां दृष्ट्वैव न युध्यते॥७॥ तस्याश्चाषाढको नाम हस्त्यारोहोत्र विद्यते॥ स च दत्वा धनं भूरि स्वीकृतस्स्यास्थितो म
या॥८॥ तदारुह्य करेणुं तां सह वासवदत्तया॥ सायुधेनाययातव्यं नक्तं गुप्तमितस्त्वया॥९॥ इहस्थश्च महामात्रो
दूरदंगितविन्नदा॥ मद्येन क्षीवतां नेयो नैतच्चेतयते यथा॥१०॥ पुलिंदकस्य सख्युस्ते पार्श्वमग्रे च याम्यहं॥ मार्ग
रक्षार्थमित्युक्त्वा ययौ यौगंधरायणः॥११॥ वत्सराजोपि तत्सर्वं कर्तव्यं हृदये व्यधात्॥ अथ वासवदत्ता सा तस्यां
तिकमुपाययौ॥१२॥ ततस्तास्ताः सविस्रंभाः कथाः कुर्वंस्तया सह॥ यौगंधरायणोक्तं च तस्यै राजा शशंस सः॥
॥१३॥ सा च तत्प्रतिपद्यैवं निश्चित्य गमनं प्रति॥ आनाय्याह्वाणकं संज्ञं हस्त्यारोहं चकार तं॥१४॥ देवपूजा
पदेशेन दत्वा मद्यं मदान्वितं॥ सर्वाधोरणसंयुक्तं महामात्रं च साकरोत्॥१५॥ ततः प्रदोषे विलसन्मेघशब्द

२२

समाकुले॥ आषाढकः करेणुं तां सज्जीकृत्यानिनाय सः॥१६॥ सज्ज्यमाना च सा शब्दं चकार करिणी किल॥ तं च
हस्तिरुताभिज्ञो महामात्रोत्र सोऽशृणोत्॥१७॥ त्रिषष्टियोजनान्यद्य यास्यामीत्याह हस्तिनी॥ इत्युवाच स चो

दृाम मद विस्वलिताक्षरं ॥१८॥ विचारार्हे पुनस्तस्य मत्तस्याभून्न मानसं ॥ तच्च हस्तिपकाः क्षीवास्तद्वाक्यं नैव शुश्रुवुः
॥१९॥ ततः स वत्सराजोत्र वीणामादाय तां निजां ॥ यौगंधरायणप्राप्तैर्योगैः स्त्रंसितवंधनः ॥२०॥ उपनीतप्रहरणः
स्वरं वासवदत्तया ॥ करेणुकायामारोहत्स तस्यां स च संनकः ॥२१॥ ततो वासवदत्तापि सह कांचनमालया ॥ सख्यार
हस्य धारिण्या तस्यामेव रुरोह सा ॥२२॥ तथोज्जयिन्या निरगात्सहास्तिपकपंचसः ॥ वत्सेशो निशि मत्तेभभिन्नप्रा
कारवर्त्मना ॥२३॥ तस्थानरक्षिणौ वीरौ स्वैरं स हतवान्नृपः ॥ वीरबाहुं तथा तालभटं राजसुतं तदा ॥२४॥ ततः प्रत
स्थे वेगेन स राजा दयितासखः ॥ दृष्टः करेणुकारूढो ददस्याषाढकेंकुशं ॥२५॥ उज्जयिन्यां च तौ दृष्ट्वा हतौ प्राकारर
क्षिणौ ॥ राज्ञेन्यवेदयन्रात्रौ क्षुभिताः पुररक्षिणः ॥२६॥ सोप्यन्विष्य क्रमाच्चंडमहासेनः पलायितं ॥ हृतवासवद
त्तं तं वत्सराजमबुध्यत ॥२७॥ ततः सुतः पालकाख्योथ जातकोलाहले पुरे ॥ अन्वधावत्तु वत्सेशमधिरूढ्य नडागि
रिं ॥२८॥ वत्सेन्द्रोपि तमायांतं पथि बाणैरयोधयत् ॥ नडागिरिः करेणुं तां दृष्ट्वा न प्रजहार च ॥१९॥ ततः स पाल
कोभ्राता पश्चादेसन्यवर्त्तत ॥ गोपालकेन वाक्यज्ञ पितृकार्यानुरोधिना ॥३०॥ वत्सराजोपि विस्त्रब्ध गंतुं प्र
ववृते ततः ॥ गछतश्चास्य शनकैर्यामिनी पर्यहीयत ॥३१॥ ततो विंध्याटवीं प्राप्य मध्यान्हे तस्य भूपतेः ॥ त्रिषष्टि

योजनायाताततृषिताभृत्करेणुका॥३२॥अवनीर्गसभार्य्येचराज्ञितस्मिन्जलानिसा॥पीत्वातद्दोषतःप्रापपंचतां
तत्रतत्क्षणं॥३३॥विषसेनाथसवत्सेशस्तत्रवासवदत्तया॥गगनाद्दुफतामेनांश्रृणोतिस्मसरस्वती॥३४॥अहंमाया
वतीनामराजन्विद्याधरांगना॥इयंतंकालमभवंशापदोषेणहस्तिनी॥३५॥उपकारंचवत्सेशतवाद्यकृतवत्यहं॥
करिष्यामिचभूयोपित्वत्सुतस्यभविष्यतः॥३६॥एषवासवदत्ताचपत्नीतेनैवमानुषी॥देवीयंकारणवशादवतीर्णा
क्षिताविति॥३७॥ततःसहृष्टोव्यसृजत्तूविंध्यस्यानुवसंतकं॥पुलिंदकायसुहृदेवक्तुंस्वागमनंनृपः॥३८॥स्वयंचपाद
चारीसन्सशनैर्दयितान्वितः॥तत्रैवगच्छन्नुत्थायदस्युभिःपर्य्यवार्यत॥३९॥धनुर्द्वितीयोदस्यूनांतेषांपंचोत्तरंशतं॥
पुरोवासवदत्तायावत्सराजःसचावधीत्॥४०॥तत्क्षणंसोथराज्ञोत्रमित्रमागात्पुलिंदकः॥यौगंधरायणसखोव
संतकपुरःसरः॥४१॥सतान्दस्यून्निवार्यायान्वत्सेशंप्रणिपत्यतं॥नयतिस्मनिजांपल्लींभिल्लराजस्यवल्लभं॥४२॥
तत्राताराात्रिमारण्याद्दर्भपादितपादपा॥सर्वेवत्सेशोविश्रामसहवासवदत्तया॥४३॥प्रातःसेनापतिश्चास्यरुम
ण्वान्प्रापदंतिकं॥यौगंधरायणेनप्राग्दत्तंसंप्रेष्यबोधितः॥४४॥अगाच्चकटकंसर्वंतथाव्याप्तदिगंतरं॥यथाविं
ध्याटवीप्रापसासंबाधरसज्ञतां॥४५॥प्रविश्यकटकेतस्मिंस्तस्यामेवाटवीभुवि॥तस्थावुज्जयिनीवार्तांज्ञातुंवत्से

श्वरोथसः॥४६॥ तत्रस्थंचतमभ्यागादुज्जयिन्यां वणिक्तदा॥ यौगंधरायणसुहृत्सचागत्यत्र सिवीदिदं॥४७॥दे
वचंडमहासेनःप्रीतोज्ञामानरित्वयिप्रेषितश्च प्रतीहारस्तेनेहभवदंतिकं॥४८॥ सचागच्छत्स्थितःपश्चादह
मग्रतएवतु॥ प्रच्छन्नः सत्वरं देवं विज्ञापयितुमागतः॥४९॥ एतच्छ्रुत्वाथवत्सेशोजहर्षचननंदसच॥ सर्वे वा
सवदत्तायासापिहर्षमगासरं॥५०॥ कृतबंधुपरित्यागाविवाहविधिमत्वरा॥ अथवासवदत्तासासलज्जा
चोत्सुकातदा॥५१॥ ततःस्वात्मविनोदायसमीपस्थवसंतकं॥ साजगादकथाकाचित्त्वयामेवर्ण्यतामिति
॥५२॥ सचमुग्धदृशस्तस्याभर्तृभक्तिविवर्द्धिनीम्॥ वसंतकस्तदाधीमानिमामकथयत्कथां॥५३॥ अस्ती
हनगरीलोकेताम्रलिप्तेतिविश्रुता॥ तस्यांचधनदत्ताख्योवणिगासीन्महाधनः॥५४॥ सचापुत्रोबहून्वि
प्रासंघग्यप्रणतोब्रवीत्॥ तथाकुरुतपुत्रोमेयथास्यादचिरादिति॥५५॥ ततस्तमूचुर्विप्रास्तेनैतत्किंचनदुष्क
रं॥ सर्वेहिसाधयंतीहद्विजाःश्रौतेनकर्मणा॥५६॥ तथाचपूर्वमभवद्राजाकश्चिदपुत्रकः॥ पंचोत्तरशतंतं
चाभूत्तस्यांतःपुरयोषितां॥५७॥ पुत्रीयेष्ट्याचतत्रैकोजंतुर्नामसुतोजनि॥ तत्सत्नीनामन्योषाणांनूतने
हृदयोदृशि॥५८॥ जानुभ्यांपर्यटंतंचबालंजातुपिपीलिका॥ कुरुदेशोददंशैनंमुक्तपूत्कारकातरं॥५९॥

ब॰क॰

२४

तावत्ततुमुलाक्रंदमंतःपुरमजायत॥राज्ञापिपुत्रपुत्रेतिचक्रंदप्राकृतोयथा॥६०॥क्षणात्तस्मिन्समाश्वस्ते
बालेयास्तपिपालिके॥दुःखैककारणंराजासनिनिंदैकपुत्रतां॥६१॥अस्तिकश्चिदुपायोमेयेनस्युर्बहवः
सुताः॥इतितत्सरितापेनपप्रच्छब्राह्मणांश्चसः॥६२॥तेतुप्रत्यब्रुवन्राजन्नुपायोत्रनवास्ति यं॥हत्वैनंतं
सुतंवन्हौतान्मांसंहूयतेखिलं॥६३॥तद्गंधाघ्राणतःसर्वाःपत्न्यःप्राप्स्यंतितेसुतान्॥एतच्छ्रुत्वासराज्ञां
तत्तथासर्वमकारयत्॥६४॥सपत्नीसमसंख्यांश्चसपुत्रान्प्रापान्नृपः॥अतस्तवापिहोमेनसाधया
मोवयंसुतं॥६५॥इत्युक्त्वाधनदत्तंतेब्राह्मणाःकृप्तदक्षिणं॥होमंचक्रुस्ततस्तस्यवणिजोजातवान्
सुतः॥६६॥गुहसेनाभिधानश्चसबालोववृधेक्रमात्॥पितास्थधनदत्तोस्यभार्यामन्विष्यतिस्मसः॥६७॥
ततःसतत्कृतेतेनतनयेनसमंययौ॥द्वीपांतरंस्नुषाहेतोर्वाणिज्यव्यपदेशतः॥६८॥तत्रदेवस्मितां
नामधर्मगुप्ताद्वणिग्वरात्॥स्वपुत्रगुहसेनस्यकृतेकन्यामयाचत॥६९॥धर्मगुप्तस्तुसंबंधंनतमंगीच

२४

कारसः॥आलोच्यताम्रलिप्तांतांदूरंदुहितृवत्सलः॥७०॥साचदेवस्मितादृष्ट्वागुहसेनंतदैवतं॥तद्गुणा
कृष्टचित्तत्वाद्बंधुत्यागैकनिश्चिता॥७१॥सखीमुखेनकृत्वाचसंकेतंसहतेनसा॥प्रियेणपितृयुक्तेनरात्री

द्वीपात्ततोययौ ॥७२॥ ताम्रलिप्तामथप्राप्य तयोः कृतविवाहयोः ॥ जायापत्योर्मिथः प्रेमपाशबद्धमभून्म
नः ॥७३॥ अथस्तंपितरि प्राप्ते प्रेरितोभूत्स्वबंधुभिः ॥ कटाहद्वीपगमने गुहसेनो वणिज्यया ॥७४॥ तस्याश्च गम
नं भार्या तदा नंगीचकार सा ॥ सेर्ष्या देवस्मिता काममन्यस्त्रीसंगशंकिनी ॥७५॥ ततः पत्न्यामनिच्छंत्यां प्रेर्य र
त्स्फु च बंधुषु ॥ कर्तव्यनिश्चलो मुग्धो गुहसेनो बभूव सः ॥७६॥ अथ गत्वा निराहारश्चक्रे देवकुले व्रतं ॥
उपायमिह देवो मे निर्दिशत्विति चिंतयन् ॥७७॥ सापि देवस्मिता तद्वत्तेन सार्द्धं व्यधाद्व्रतं ॥ ततो नयोः शिवः स्व
प्ने दर्शनं ददौ ॥७८॥ द्वे च रक्तांबुजे दत्वा स देवस्ताव भाषत ॥ हस्ते गृहीत मे केकं पद्ममेतद्युभावपि ॥७९॥ दू
रस्थत्वे च यद्येकः शीलखंडं करिष्यति ॥ तदान्यस्य करे पद्मं म्लानिमेष्यति नान्यथा ॥८०॥ एतच्छ्रुत्वा प्रबुध्यै
व दंपती तावपश्यतां ॥ अन्योन्यस्यैव हृदयं हस्तस्थं रक्तमंबुजं ॥८१॥ ततः स चक्रे प्रस्थानं गुहसेनो धृतांबु
जः ॥ सा तु देवस्मिता तस्थौ गृहे पद्मार्पितेक्षणे ॥८२॥ गुहसेनोपि तं प्राप कटाहद्वीपमाशु सः ॥ कर्तुं प्रववृते चात्र
रत्नानां क्रयविक्रयौ ॥८३॥ हस्ते तस्य च तद्दृष्ट्वा सदैवाम्लानमंबुजं ॥ तत्र केचिद्वणिक्पुत्राश्चत्वारो विस्मयं य
युः ॥८४॥ ते युक्त्या तं गृहं नीत्वा पाययित्वा भृशं मधु ॥ पप्रच्छुः पद्मवृत्तांतं सोपि क्षीबो जगाद तं ॥८५॥ ततस्तं

चिरनिर्वास्येरत्नादिक्रयविक्रयैः॥ विचिंत्यगुहसेनंतेचत्वारोपिवणिक्सुताः॥८६॥ संमंत्र्यकौतुकात्पापास्तद्भा
र्याशीलविप्लवं॥ चिकीर्षवोययुश्शीघ्रंताम्रलिप्तीमलक्षिताः॥८७॥ तत्रोपायंविचिन्वंतःसुगतायतनस्थि
तां॥ प्रव्राजिकामुपाजग्मुर्नाम्नायोगकरंडिकां॥८८॥ प्रीतिपूर्वंचतामूचुर्भगवत्यस्मदीप्सितं॥ साध्यतेचेत्त
यातत्तेदास्यामोर्थान्बहूनिति॥८९॥ साप्युवाचध्रुवंयूनांकापिस्त्रीवांछितेहवः॥ तच्छ्रुत्वासाधयाम्येवध
नलिप्सापिनास्तिमे॥९०॥ अस्तिसिद्धिकरीनामशिष्यामेबुद्धिशालिनी॥ तत्प्रसादेनसंप्राप्तमसंख्या
तंधनंमया॥९१॥ कथंशिष्याप्रसादेनभूरिप्राप्तंधनंत्वया॥ इतिसातैर्वणिक्पुत्रैःपृष्टाप्रव्राजिकाब्रवी
त्॥९२॥ कौतुकंयदितत्पुत्राःश्रूयतांवर्णयामिवः॥ इहकोपिवणिक्पूर्वमाययावुत्तरापथात्॥९३॥
तस्येहस्थस्यमच्छिष्यासागत्वापिचशिश्रिये॥ युक्त्याकर्मकरीभावंकृतरूपविवर्त्तना॥९४॥ विश्वास्यवा
णिजंतंचतद्गृहात्स्वर्णसंचयंसर्वंमुषित्वाप्रच्छन्नंप्रत्यूषेसाथनिर्ययौ॥९५॥ नगरीनिर्गतांदृष्ट्वाशं
कयाशीघ्रगतिंचतां॥ मदंगहस्तोमोषायडोंबःकोप्यनुगाद्द्रुतं॥९६॥ न्यग्रोधस्यतलंप्राप्यसादृष्ट्वातमु
पागतं॥ डोंबंसिद्धिकरीधूर्त्तासादैन्येनेदमब्रवीत्॥ भर्त्रासहेर्ष्याकलहंकृत्वाहंनिर्गतागृहात्॥ दूरंगंत

दृढपाशोत्र त्वयामेरच्यतामिति ॥ ९८ ॥ पाशेन म्रियतामेषा किमेतां हन्म्यहं स्त्रियम् ॥ मत्वेडोंबस्तत्रासौ रक्षेपाश
मसज्जयत् ॥ ९९ ॥ ततः सिद्धकरी डोंबं सा मुग्धेव जगाद तं ॥ क्रियते कथमुद्बंधस्त्वयामे दृश्यतामिति ॥ १०० ॥ ततः
स डोंबस्तं दत्वा मृदंगं पादयोरधः ॥ दृत्थं क्रियेत इत्युक्त्वा स्वकंठे पाशमर्पयत् ॥ १ ॥ सापि सिद्धिकरी सद्यस्तं मृदंगमचू
र्णयत् ॥ पादाघातेन डोंबो थ सोपि पाशेव्यपद्यत ॥ २ ॥ तत्कालमागतोन्वेषुं रक्षमूले ददर्श सः ॥ मुषितार्शेपकोशांतां
दूरात्सिद्धिकरी वणिक् ॥ ३ ॥ सापि दृष्वा तमायांतं वृक्षे तस्मिन्नलक्षितं ॥ आरुह्य तस्थौ शाखायां तमसत्रछन्नविग्रहा
॥ ४ ॥ स चागत्य वणिक् याव त्सभृत्यः पाशबंधनम् ॥ डोंबमेव तदाद्राक्षीन्नतु सिद्धिकरीं क्वचित् ॥ सा नाम वृक्षमारूढा
माभवेदिति तत्क्षणं ॥ एकोस्य वणिजो भृत्यस्तरूमारोहति स्मतं ॥ ६ ॥ सदा त्वय्येव मे प्रीति रिहारूढस्त्वमेव च ॥ तत्सुं
दरतवैवेदं धनमेहि भजस्व मां ॥ ७ ॥ इत्युक्त्वालिंग्य चुंबंती सास्य सिद्धिकरी मुखं ॥ वणिग्भृत्यस्य दशनैर्जिह्वाम्
सवणिग्भृत्यो भूतग्रस्तमवेसतं ॥ स्वगृहं भृत्यसहितः पलाय्यैव ततो ययौ ॥ १० ॥ अथावतीर्य रक्षाग्रात्तदुद्वीना
च तापसी ॥ अगाद्गृहं समादाय तत्सा सिद्धिकरी धनं ॥ ११ ॥ एवं विधासामच्छिष्या बहुप्रज्ञानशालिनी ॥ एवं च नत्स

बृ·क·

२६

सार्द्धेन पुत्राः प्राप्तं मया धनं ॥१२॥ इत्युक्त्वा तान्वणिक्पुत्रानथ प्रव्राजिका निजं ॥ तत्कालमागतां शिष्यामेतेभ्यस्तामद
र्शयत् ॥१३॥ जगाद चैनां न सुत्राः सद्भाववदनाधुना ॥ कांश्चित्प्रियं वांछथ क्षिप्रं तामहं साधयामि वः ॥१४॥ तच्छ्रुत्वा ते च
तामूचुर्यैषा देवस्मिताभिधा ॥ गृहस्ते न वणिग्भार्या तया नः संगमं कुरु ॥१५॥ श्रुत्वेति प्रतिजज्ञे ते सा कार्य्यं प्रव्राजिका
थ सा ॥ वणिक्पुत्रानां चैतेषां स्वगृहं स्थितये ददौ ॥१६॥ रंजयित्वाथ तत्रस्थं जनं भक्ष्यादिदानतः ॥ गुहसेनगृहं
तस्या विवेश सह शिष्यया ॥१७॥ ततो देवस्मितावासगृहद्वारमुपागमत् ॥ तां श्वा नीभं खलाद्वद्धां रुरोधापूर्वरोदि
नीं ॥१८॥ ततो देवस्मिता दृष्ट्वा सा तां प्रावेशयत्स्वयं ॥ किमागतास्यादिशेति विचिंत्य प्रेष्य चेटिकां ॥१९॥ प्रविश्य चाशि
षं दत्वा कृत्वा व्याजे कृतादरां ॥ साध्वीं देवस्मितां सा तां पापा प्राव्राजिकाभ्यधात् ॥२०॥ सदैव त्वद्दिदृक्षा मे भवत्यद्य पुन
र्मया ॥ स्वप्ने दृष्टासि तेनाहमुत्का त्वां द्रष्टुमागता ॥२१॥ भर्त्रा विनाकृतां त्वां च दृष्ट्वा मे दूयते मनः ॥ प्रियो हि भोगवंध्ये हि
विफले रूपयौवने ॥२२॥ इत्यादिभिर्वचोभिस्तां साध्वीं विश्वास्य सा चिरं ॥ आमंत्र्य सा ययौ तावद्गृहं प्रव्राजिका नि
जं ॥२३॥ द्वितीयेन्हि गृहीत्वाथ मरीचक्षोदनिर्भरं ॥ मांसखंडं पुनः सानद्य ययौ देवस्मितागृहं ॥२४॥ द्वारि श्वन्यै ददौ त
स्यै मांसखंडं च तत्र तं ॥ सापि तं भक्षयामास सद्यः समरिचं शुनी ॥२५॥ ततो मरिचदोषेण तस्या दृग्भ्यामवारितं ॥ अश्रा

२६

51

श्रुप्रववृते तस्याः प्रस्तोतिस्म च नासिका ॥२६॥ सापि प्रव्राजिका तस्मिन् क्षणे देवस्मितांतिकं ॥ प्रविश्य तद्भक्ता निथ्या
प्रारेभे रोदितुं शठा ॥ पृष्टा च देवस्मितया साकृच्छ्रादेवमब्रवीत् ॥ स्वदृशं प्रति पश्यैतां बहिः प्ररुदतीं शुनीं ॥ एषाहं द्विप
रिज्ञाय मां जन्मांतरसंगतां ॥ प्ररुन्नारोदितुं तेन कृपया श्रुममोक्तनं ॥२९॥ तच्छ्रुत्वा बहिरालोक्य शुनीं तां रुदतीमिव ॥
किमेतच्चित्रमिति सा दध्यौ देवस्मिता क्षणं ॥३०॥ प्रव्राजिकाथ सावादीत् सुत्रि पूर्वत्र जन्मनि ॥ अहमेषा च भार्ये द्वे विप्र
स्याभूव कस्यचित् ॥३१॥ स चावयोः पतिर्दूरं देशांतरमितस्ततः ॥ वारंवारं मया निस्मराजादेशेन दूतया ॥३२॥ तत्रावासेन
कुर्वत्यास्वेच्छं पुरुषसंगमं ॥ मयाभूतेंद्रियग्रामो नोपभोगैरवंच्यत ॥३३॥ भूतेंद्रियानभिद्रोहो धर्मो हि परमो मतः ॥ अतो
जातिस्मरा पुत्रि जाताहमिह जन्मनि ॥३४॥ एषा तु शीलमेवैकं ररक्षाज्ञानतस्तदा ॥ तेन श्वयोनौ पतिता किंतु जातिंस्मर
त्यसौ ॥३५॥ कोयं धर्मो ध्रुवं धूर्त्तरचनेयं कृतानया ॥ इति संचिंत्य सुप्रज्ञा सा तं देवस्मिताब्रवीत् ॥३६॥ इयच्चिरं मया
धर्मो न ज्ञातो भगवत्ययं ॥ तत्त्वं केनापि कांतेन पुंसा मे संगमं कुरु ॥३७॥ ततः प्रव्राजिकावादीत्स्त्रे चिद्वीपांतरागताः ॥ इह
स्थिता वणिक्पुत्रास्तर्हिं तानानयामि ते ॥३८॥ इत्युक्त्वा सा प्रमुदिता ययौ प्रव्राजिका गृहं ॥ सा च देवस्मिता स्वैरं स्वचेटी
रित्यभाषत ॥३९॥ नूनं व दृष्टात दम्लानं हस्तोमद्भर्त्तुरंबुजं ॥ पृष्ट्वा नं च यथा वृत्तं मत्ययं जातुकौतुकात् ॥४०॥ मद्विध्वंसाय

केप्येनेद्वीपास्तस्मादिहागताः॥ वणिक्पुत्राः शठानैश्च प्रयुक्तेयं कुतापसी॥४१॥ तद्धत्तूरकसंयुक्तं मद्यमानयतद्रुतं॥ दत्ता
चकास्यपथ्वं चत्पुनः पादमयोमयं॥४२॥ इति देवस्मितोक्तास्ताश्चेट्यश्चक्रुस्तथैव नत॥ एका च चेटी तद्यं नद्वाक्यादक
रोत्तदा॥४३॥ सापि प्रव्राजिका तस्माद्वणिक्पुत्र चतुष्टयात्॥ अयं प्रथमिकोसुक्त्वा प्रादायैकमथाययौ॥४४॥ स्व
शिष्यावेशसंछन्नं तं चक्रे देवस्मिनागृहे॥ सायच सायं प्रवेश्यैव निर्गत्य प्रकटं ययौ॥४५॥ ततोत्र नं वणिक्पुत्रं तत्साध
त्तूरकं मधु॥ चेटी देवस्मितावेशासा सादरमपाययत्॥४६॥ तेन सोविनयेनेव मधुनाहृतचेतनः॥ दूत्वा वस्त्रादि
चेटीभिस्तत्र चक्रे दिगंबरः॥४७॥ पुनः पादेन दत्त्वां कं ललाटेताभिरेव च॥ नीत्वा सोशुचिसंपूर्णे क्षिप्तोभूत्ववान
केनिशि॥४८॥ यामेथ पश्चिमे संज्ञां लब्ध्वात्मानं ददर्श सः॥ स्वपापोनेपे तेमग्न मरीचाविवरवानके॥४९॥ अथोत्था
यकृतस्नानो ललाटे कं परामृशन्॥ नग्नः सन्सवणिक्पुत्रो ययौ प्रव्राजिकागृहं॥५०॥ ममैकस्यैव हास्यत्वं माभूदि
तिसतत्र तान्॥ अगच्छन्मुषितोस्मीति सखीनन्यानभाषत॥५१॥ जागरेणातियानेन शिरोर्त्तिं व्यपदिश्य च॥ प्रातः
सतस्थौ वस्त्रेण वेष्टयित्वा कितं शिरः॥५२॥ तथैव च पुनः सायं द्वितीयोपि वणिक्सुतः॥ एत्य देवस्मितागेहं स्वलीका
रमवाप्तवाप्तवान्॥५३॥ सोयेत्य नग्न वक्तिस्म तत्रैवाभरणान्यहं॥ स्थापयित्वापि निर्यातो मुषितस्तस्करैरिति॥५३॥

प्रातः सोपि शिरः शूलव्यपदेशेन चेष्टनं ॥ कृत्वा प्रछादयामास ललाटतटमंकितं ॥५५॥ एवं सा पन्हवाः सर्वे वणिक्पुत्राः
क्रमेणागते ॥ प्रापुः साकं खलीकारमर्थनाशं च लज्जिताः ॥५६॥ अस्यापि भवसेवमिति तेन च खलीकृतिं ॥ तस्याः प्रव्राजिका
यास्ताम प्रकाश्य ततो ययुः ॥५७॥ साथ प्रव्राजिकान्येद्युर्जगाम सह शिष्यया ॥ कृतप्रयोजनास्मीति हृष्टा देवस्मि
तागृहं ॥५८॥ तत्र देवस्मिता सा तां कृतादरमपाययत् ॥ मधुधत्तूरसंयुक्तं परितोषादिवाहृतं ॥५९॥ तेन मत्तां सशि
ष्या च छिन्नश्रवणनासिकां ॥ तामप्यशुचिकुल्यांतः क्षेपयामास सा सती ॥६०॥ गत्वा चैतेन वणिक्पुत्राः पतिं हन्युः
कदाचन ॥ इत्याकुला च साश्वश्र्वास्तं वृत्तांतमवर्णयत् ॥६१॥ ततः श्वश्रूरवादीत्तां पुत्रि साधु कृतं त्वया ॥ किंतु पुत्रस्य
मे तस्य तदाचिदहितं भवेत् ॥६२॥ ततो देवस्मितावोच यथा शक्तिमती पतिं ॥ ररक्ष प्रज्ञया पूर्वं ममुं रक्षाम्यहं तथा ॥
॥६३॥ कथं शक्तिमती पुत्रि ररक्ष पतिमुच्यतां ॥ इति पृष्टा तया श्वश्र्वा साथ देवस्मिताब्रवीत् ॥६४॥ अस्मद्देशे पुर
स्यांतर्मणिभद्र इति श्रुतः ॥ पूर्वैः कृतप्रतिष्ठोस्ति महायक्षः प्रभाविनः ॥६५॥ यस्योपाचितान्येत्य तत्रस्थाः कुर्वते जनाः
॥ तत्तद्वांछितसंसिद्धिहेतोस्तैस्तैरुपायनैः ॥६६॥ यो नरः प्राप्यते तत्र रात्रौ सह परस्त्रिया ॥ प्राप्यते सोस्य यक्षस्य गर्भा
गारे तया समम् ॥६७॥ प्रातस्तत्रैव सस्त्रीकः स नीत्वा राजसंसदि ॥ प्रकटीकृततद्वृत्तो निग्रह्यत इति स्थितिः ॥६८॥ ए

ब॰क॰

कदा तत्र नक्तं च संगतः परजायया॥ वणिक्कुसमुद्रदत्ताख्यः प्राप्तोभूत्पुररक्षिणा॥६९॥ नीत्वा च तेन क्षिप्तोभूत्स
परस्त्रीक एव सः॥ यक्षदेवगृहे तस्मिन्मूढदत्तोर्गलो वणिक्॥७०॥ तत्क्षणं च वणिजश्चास्य महाप्रज्ञा पतिव्रता॥

२८

भार्या शक्तिमती नाम तं वृत्तांतमबुध्यत॥७१॥ साथ धीरान्यरूपेण तद्यक्षापतनं निशि॥ पूजामादाय साश्वा
संसखीजनयुता ययौ॥७२॥ तत्रैत्य दक्षिणालोभादेतस्या एव भोगकः॥ ददौ प्रवेशमुद्घाट्य द्वारमुक्त्वा पुराधिपं
॥७३॥ सा च प्रविश्य सस्त्रीकं दृष्टेयसौ विलक्षितं स्ववेशं कारयित्वा तं निर्याहीत्यवदत्स्त्रियम्॥७४॥ सा च निर्ग
स रात्रौ स्त्री तद्वेशैव ततो ययौ॥ तस्थौ शक्तिमती तत्र तेन भर्त्रा समं च सा॥७५॥ प्रातश्च राजाधिकृतैस्तैरेत्य याव
न्निरूप्यते॥ तावत्स्वपत्न्यैव युतः स वैः स ददृशे वणिक्॥७६॥ तद्बुध्वा यक्षभवनान्मृत्योरिव मुखान्नृपः॥ दं
डयित्वा पुराध्यक्षं वणिजं तममोचयत्॥७७॥ एवं शक्तिमती पूर्वं ररक्ष प्रज्ञया पतिं॥ हंतथैव भर्त्तारं गत्वार

अ

क्षामि बुद्धितः॥७८॥ इति देवस्मिता श्वश्रूमूरह उक्त्वा मनस्विनी॥ स्वचेटिकाभिः सहिता वणिग्वेषं चकार सा॥

२८

॥७९॥८०॥ आरुह्य च प्रवहणं वणिज्याव्याजतस्ततः॥ कटाहद्वीपमगमद्यत्र सोस्याः पतिः स्थितः॥८१॥ तत्वा च तं
पतिं तत्र वणिग्मध्ये ददर्श सा॥ गुहसेनं समाश्वास्यै समिवमूर्त्तिधरं बहिः॥८२॥ सोपि तां पुरुषाकारां दूरं दृष्ट्वा

पिबन्निव ॥ प्रियायाः सदृशः कोयं वणिकूस्यादिस्य चिंतयन् ॥ ८३ ॥ सा च देवस्मितानत्र रूपं गलाव्य जिज्ञपत् ॥ विज्ञ
प्तिर्मेस्ति तत्सर्वाः संघाघ्यंतां प्रजा इति ॥ ८४ ॥ ततः सर्वान्समानीय पौरान्राजा सकौतुकः ॥ कांते विज्ञप्तिरस्तीति व
णिग्वेशामुवाच तां ॥ ८५ ॥ ततो देवस्मितावादीदिह मध्ये व्यवस्थिताः ॥ पलाय्य दासाश्चत्वारस्तान्मे देवः प्रयछतु
॥ ८६ ॥ अथ तामवदद्राजा सर्वे पौरा इमे स्थिताः ॥ तत्सर्वान्प्रसभिज्ञाय निजान्दासान्गृहाण तान् ॥ ८७ ॥ ततस्त
या जगृहिरे स्वगृहे प्राक्कृतखलीकृताः ॥ वणिक्सुतास्ते चत्वारः शिरस्याबद्धशाटकाः ॥ ८८ ॥ सार्थवाहसुता एते कथं दा
सा भवंतिते ॥ इति क्रुद्धाश्च तांमूचुस्तत्रस्था वणिजस्तदा ॥ ८९ ॥ ततः प्रसब्रवीत्सा तान्यदि न प्रत्ययो स्ति वः ॥ ल
लाटं वीक्ष्यतामेषां श्वपादांकितं मया ॥ ९० ॥ तथेति तेषामुन्मोच्य चतुर्णां शीर्षपट्टकान् ॥ सर्वे पि ददृशुस्तत्र
कू श्वपादं ललाटगं ॥ ९१ ॥ लज्जिते थ वणिग्ग्रामे राजा संजातविस्मयः ॥ किमेतदिति पप्रछ सतां देवस्मितां स्वयं
॥ ९२ ॥ सा शशंस यथावृत्तं सर्वेपि जहसुर्जनाः ॥ न्याय्यास्ते भवतीदासा इति तां चावदन्नृपः ॥ ततोन्ये वणिजस्तेषां
चतुर्णां दास्यमुक्तये ॥ ९३ ॥ ददुस्तस्यै धनं भूरि साध्यै दंडं च भूपतेः ॥ आदाय तद्धनमवाप्य पतिं च तं स्वदेवस्मि
ता सकलसज्जनपूजिता च ॥ प्रसा ययौ निजपुरीमथ ताम्रलिप्तीं नास्यावभूव वपुनः प्रियविप्रवासः ॥ १९५ ॥

इति स्त्रियो देवि महाकुलोद्गता विशुद्धवीरैश्वरि नैरूपासते ॥ सदैव भर्तारमनन्यमानसाः पतिः सतीनां परमं हि

दैवतं ॥९६॥ इत्याकर्ण्यैव संतकस्य वदनादेतामुदारां कथां ॥ मार्गे वासवदत्तया नवपरित्यक्ते पितुर्वेश्मनि ॥ तज्ज्ञाया

सदनं विधाय विदधे वत्सेश्वरे भर्त्तरि प्राक्प्रौढप्रणयावबद्धमपि तद्भक्त्येकतानं मनः ॥९७॥ इति श्रीभट्टसोमदेव

विरचिते कथासरित्सागरे कथामुखलंबके देवस्मिताकथा नाम पंचमस्तरंगः ॥५॥ आदितस्त्रयोदशः ॥१३॥

अथ विंध्यांतरे तत्र वत्सराजस्य तिष्ठतः पार्श्वं चंडमहासेनप्रतीहारः समाययौ ॥१॥ स चागत्य प्रणम्यैनं राजान

मिदमब्रवीत् ॥ राजा चंडमहासेनस्त्वं संदिष्टवानिदं ॥२॥ युक्तं वासवदत्ताया स्वयमेव त्वयाहृता ॥ तदर्थमेव हि

मयात्वमानीतद्विहाभवः ॥३॥ संयतस्य न चैवेह दत्तैषा तेमया स्वयं ॥ नैवमस्मासु ते प्रीतिर्भवेदिति विशंकिता ॥४॥ ति

तदिदानीमविधिनाममस्या दुहितुर्यथा ॥ न विवाहो भवान्राजन्प्रतीक्षेत तथा मनाक् ॥५॥ गोपालको हि न

चिराद्त्रैवेष्यति मत्सुतः ॥ स तस्याः स्वसुरुद्वाहं यथाविधि विधास्यति ॥६॥ इतीमं वत्सराजाय संदेहशम

वधार्यसः ॥ तं तु वासवदत्तायै प्रतीहारो न्यवेदयत् ॥७॥ ततः सानंदया साकं तया वासवदत्तया ॥ हृष्टो वत्सेश्व

रश्चक्रे कौशांबीगमने मनः ॥८॥ गोपालकस्यागमने प्रतीक्षेथा युवामिति ॥ तेनैव सपश्चाच्च कौशांबीमाग

मिष्यथः॥९॥इत्युक्त्वास्थापयामाससतत्रैवमहीपतिः॥श्वाशुरंतंप्रतीहारंस्वमित्रंचपुलिंदकं॥१०॥ततोनुयाता
नागेंद्रैःस्रवद्भिर्मदनिर्झरान्॥अनुरागागतैर्विंध्यप्राग्भारैरिवजंगमैः॥११॥तुरंगसैन्यसंघातखुराघातसशब्द
या॥स्तूयमानइवोत्क्रांबंदिसंदर्भयाभुवा॥१२॥नभोविलंघिभिःसेनारजोराशिभिरुद्धतैः॥सपक्षभूभृदुल्ला
सशंकांकुर्वन्शतक्रतोः॥१३॥सप्रतस्थेततोदेव्यासहवासवदत्तया॥स्वांपुरींप्रतिराजेंद्रःप्रातरेवापरेहनि॥१४॥
ततश्चदिवसैर्द्वित्रैर्विषयंतमवाप्यसः॥विशश्रामनिशामेकांरुमण्वन्मंदिरेनृपः॥१५॥अन्येद्युस्तांचकौशांबीं
चिरात्प्राप्तमहोत्सवः॥मार्गोन्मुखोत्सुकजनांप्रविवेशप्रियासखः॥१६॥तदाचस्त्रीभिरारनुमंगलस्नानमं
डनाचिरादुपगतेपत्यौबभौनारीवसापुरी॥ददृशुश्चात्रयोरास्तंवत्सराजंवधूसखं॥प्रशांतशोकाःशिखि
नःसविद्युतमिवांबुधैदं॥१८॥हर्म्याग्रसंस्थाःपिदधुःपौरनार्योमुखैर्नभः॥व्योमगंगांतरोत्फुल्लहेमांभो
रुहविभ्रमैः॥१९॥ततःस्वराजभवनंवत्सराजोविवेशसः॥नृपश्रियेवपरयासहवासवदत्तया॥२०॥सेवा
यतनृपोत्कीर्णमागधोद्गीतमंगलं॥सुप्तप्रबुद्धमिवतद्बभौराजगृहंततः॥२१॥अथवासवदत्तायाभ्रातागो
पालकोचिरात्॥आययौसहकृत्वातौप्रतीहारपुलिंदकौ॥२२॥कृतप्रत्युद्गमंराज्ञातमानंदमिवापरं॥प्रा

बृ.क.

पवासवदत्तासासहर्षोत्फुल्ललोचना॥२३॥अमुंभ्रातरमेतस्याःपश्यंत्यामास्मभूत्त्रपा॥दूतीवतस्यास्तत्कालं
रुरोधास्रुविलोचने॥२४॥पितृसंदेशवाक्यैश्चतेनयोत्साहिताथसा॥मेनेकृतार्थमात्मानंस्वजनेनसमागतं

३०

॥२५॥ततोयथावद्ववृतेतस्यवत्सेश्वरस्यच॥ययोगोपालकोन्येद्युस्तत्रोद्वाहसमहोत्सवे॥२६॥रतिवल्लीनवो
द्भिन्नमिवपल्लवमुज्ज्वलं॥पाणिंवासवदत्तायाःसोथवत्सेश्वरोग्रहीत्॥२७॥सापिप्रियवरस्पर्शसांद्रानंद
निमीलिता॥सकंपयस्वेददिग्धांगीगाढरोमांचचर्चिता॥२८॥सासंमोहनवायव्यवारुणास्त्रैर्निरंतरैः॥
विद्धेवपुष्पचापेनतत्क्षणंसमलक्ष्यत॥२९॥दृग्भिर्भ्रामिताभ्रायांतस्यावह्निमदक्षिणे॥मदिरामधुमा
धुर्यसूत्रपातमिवाकरोत्॥३०॥गोपालकार्पितैरत्नैराज्ञांचोपायनैस्तदा॥पूर्णकोशोददौसभ्यांवत्सेशोरा
जसूयतां॥३१॥निवर्तितविवाहौतावादौलोकस्यचक्षुषि॥वधूवरौविविशतुःपश्चात्स्वेवासवेश्मनि॥
३२॥अथसंमानयामासपट्टबंधादिनास्वयं॥निजोत्सवेवत्सराजेगोपालकपुलिंदकौ॥३३॥राज्ञीसंमा

३०

नानार्थंचपौराणांचयथोचितं॥यौगंधरायणस्तेनरुमण्वांश्चन्ययुज्यत॥३४॥ततोब्रवीदुमण्वंतमे
वंयौगंधरायणः॥राज्ञाकष्टेनियुक्तोस्वेलोकचित्तंहिदुर्गहं॥३५॥अरंजितश्चवालोपिदोषमुत्पादये

द्रुवं॥ तथाचश्रृण्विमांबालविनश्यककथांसखे॥३६॥ बभूवरुद्रशर्माख्यः कश्चनब्राह्मणः पुरा॥ बभूवतुश्चतस्यद्वे
गृहिण्यौगृहमेधिनः॥३७॥ एकासुतंप्रसूयैवतस्यपंचत्वमाययौ॥ तत्सुनोपरमातुश्चहस्तेतेनार्पितोथसः॥३८॥ साच
किंचिद्विवृद्धमस्यरूक्षंतस्याशनंददौ॥ सोपितेनाभवद्बालोधूसरांगः पृथूदरः॥३९॥ मातृहीनस्तथायंमेकथंशिशुरुपे
क्षितः॥ इतिनामपरांपत्नीरुद्रशर्माथसोभ्यधात्॥४०॥ सेव्यमानोपिहिस्नेहैरीदृगेवकिमप्यसौ॥ किंकरोम्यहमस्येति
साप्येवंपतिमब्रवीत्॥४१॥ नूनमेवंस्वभावोयमितिमेनेचसद्विजः॥ स्त्रीणामालोकमुग्धंहिवचः कोमन्यतेमृषा॥
४२॥ बालएवविनश्योयमितिबालविनश्यकः॥ नाम्नासबालकस्तत्रसंवृतोभूसितुगृहे॥४३॥ असावपरमातामांक
दर्थयतिसर्वदा॥ वरंप्रतिक्रियांकांचिन्नदेनस्याः करोम्यहं॥४४॥ इतिसंचिंतयामाससोयंबालविनश्यकः॥ व्यतीतपंचव
र्षोपिवयसाबनबुद्धिमान्॥४५॥ अथागनंराजकुलाज्जगादपितरंरहः॥ तातद्वौममतातौस्तइत्यद्धोविस्मयागिरा॥
४६॥ एवंप्रसहमाहस्मसबालःसोपितत्पिता॥ तस्योपपत्तिमाशंक्यभार्यास्पर्शेप्यवर्जयेत्॥४७॥ सापितृध्योविनादो
षंकस्मान्मेकुपितःपतिः॥ किंस्विद्बालविनष्टेनकृतंकिंस्विद्भवेदिति॥४८॥ सादरंस्नपयित्वाचदत्वास्निग्धंचभोजनं॥
कृत्वोत्संगेचपप्रछसातंबालविनश्यकं॥४९॥ पुत्रकिंरोषितस्तातोरुद्रशर्मापित्वयामयितत्कुलेसतांबालोजगादपरमा

दूरं ॥५०॥ अतोधिकं नेकर्त्तास्मि न चेद् घापिश्राम्यसि ॥ स्वपुत्रपोषिणी कस्मात्त्वं मां क्लिश्नासि सर्वदा ॥५१॥ तच्छ्रुत्वा प्र
णता सा तं बभाषे न्नापथ्योन्तरं ॥ पुनर्नैवं करिष्यामि तत्प्रसादय मे पतिं ॥५२॥ ततः स बालो वादीत्तां तर्ह्यायातस्य मत्पितुः
आदर्शं दर्शय त्वेकात्वच्चेटीवेम्म्यहं परं ॥५३॥ तथेत्युक्त्वा तथा चेटी नियुक्ता रुद्रशर्मणः ॥ आगतस्य क्षणात्तस्य दर्शया
मास दर्पणं ॥५४॥ तत्र तस्यैव तत्कालं प्रतिबिंबं स दर्शयन् ॥ सोयं द्वितीयस्तातो मे ताते त्याह स्म बालकः ॥ तच्छ्रुत्वा विग
ताशंकस्ता मकारण भूषितां ॥ पत्नीं प्रति प्रसन्नोभूद् रुद्रशर्मा तदेवसः ॥५६॥ एवं मुसादये द्दोषं बालोपि विकृतिंगतः ॥
तद्ययं जननीयो नः सम्यक्परिकरो खिलः ॥५७॥ इत्युक्त्वा सरुमरावत्कः सोथ यौगंधरायणः ॥ सर्वं सस्मानयामास व
त्सराजोत्सवे जनं ॥५८॥ तथा च राजलोकं तौ रंजयामासतुर्यथा ॥ मदेकप्रवणावेताविति सर्वोप्यमन्यत ॥५९॥ तौ
चाप्यपूजयद्राजा सचिवौ स्वकरार्पितैः ॥ वस्त्रांगरागाभरणैर्ग्रामैश्च सवसंतकौ ॥६०॥ कृतोद्वाहोत्सवः सवसोथयु
क्तो वत्सेश्वरस्तया ॥ मनोरथफलान्येव मेने वासवदत्तया ॥६१॥ चिरादुन्मुद्रितः स्नेहात्क्रोप्यभूत्स ततं तयोः ॥ निशां
तक्लिष्टचक्राद्धरीतिद्दूघोरसक्रमः ॥६२॥ यथा यथा च दंपत्योः प्रौढिं परिचयो ययौ ॥ तयोस्तथा तथा प्रेम नवीभावमि
वाययौ ॥६३॥ गोपालकोथ वीवाहं कर्त्तुं संदेशतः पितुः ॥ प्रययौ शीघ्रमावृत्तिं वत्सराजेन याचितः ॥६४॥ सोपि वत्से

श्वरोजातुचपलःपूर्वसंगतां॥गुप्तंविरचितांनाममभेजेंतःपुरचारिकां॥६५॥नष्टोत्रस्खलनेदेवीपादलग्नःप्रसा
दयन्॥लेभेसुभगसाम्राज्यमभिषिक्तस्तदस्रुभिः॥६६॥किंचबंधुमतींनामराजपुत्रींभुजार्जितां॥गोपालकेनप्र
हितांकन्यांदेव्याउपानयत्॥६७॥तथामंजुलिकेत्येवनाम्नान्यैनैवगोपितां॥अपरामिवलावण्याजलधेरुद्गतां
श्रियं॥६८॥वसंतकसहायस्सन्नृपोद्यानलतागृहे॥गांधर्वविधिनागुप्तमुपयेमेसभूपतिः॥६९॥तच्चवासवद
त्तास्यददर्शनिभृतंस्थिता॥प्रचुकोपचबुध्वाचसानिनायवसंतकं॥७०॥ततःप्रव्राजिकांतस्याःसखींपितृकुलाग
तां॥ससांकृत्यायनींनामशरणंशिश्रियेनृपः॥७१॥सातांप्रसादयेद्देवींतथासेवयथास्वयं॥ददौबंधुमतींनामरा
ज्ञेपेशलंहिसतीमनः॥ततस्तंबंधनाद्देवीसामुमोचवसंतकं॥साचाग्रतोभवद्राज्ञीहसन्नितिजगादतां॥७३॥बंधु
मत्यापराद्धंचकिंमयादेवितेकृतं॥दुंदुभेषुप्रहरथक्रुद्धासूपमहीन्प्रति॥७४॥एतत्वमुपमानंव्याचक्ष्वेतिकुतूहला
त्॥देव्याएष्टस्तयासोथपुनराहवसंतकः॥७५॥पुराकोपिरुरुर्नाममुनिपुत्रोयदृच्छया॥परिभ्रमन्ददर्शैकांक
न्यामद्भुतदर्शनां॥७६॥विद्याधरात्समुत्पन्नांमेनकायांद्युयोषिति॥स्थूलकेशेनमुनिनावर्द्धितामाश्रमेनिजे॥
७७॥पृषद्वराचसानाम्नादृष्ट्वातस्यरुरोर्मनः॥जहारसोथगत्वातांस्थूलकेशमयाचत॥७८॥स्थूलकेशोपिता

कं·कु

३२

मस्मै प्रतिशुश्राव कन्यकां ॥ असन्ने च विवाहे तामकस्माद्दष्टवानहिः ॥ ७९ ॥ ततो विषण्णहृदयः शुश्रावेमां गिरं दिवि ॥ एतां क्षीणायुषं ब्रह्मन्स्वायुषोऽर्द्धेन जीवय ॥ ८० ॥ तच्छ्रुत्वा स ददौ तस्यै तदेवार्द्धं निजायुषः ॥ प्रत्युज्जिजीव सोतेन सोपि तां परिणीतवान् ॥ ८१ ॥ अथ क्रुद्धो रुरुः सर्वं [?]स्कन्यं संसर्पं ददर्श सः ॥ तं तं जघान भार्या त्वेदशा मामि[?]र्भवेदिति ॥ ८२ ॥ अथैकस्तं जिघांसंतं मर्त्यवाचाह डुंडुभः ॥ अहिभ्यः कुपितो ब्रह्मन्हंसि त्वं डुंडुभं कथं ॥ ८३ ॥ अहिना ते प्रिया दष्टा विभिन्नो चाहिर्डुंडुभो ॥ अहयः सविषाः सर्वे निर्विषा डुंडुभा इति ॥ ८४ ॥ तच्छ्रुत्वा मत्सखा दीनं सखे कोनु भवानिति ॥ डुंडुभोप्यवदद्ब्रह्मन्नहं शापच्युतो मुनिः ॥ ८५ ॥ भवत्संवादपर्यंतः शापो मयमभवच्च मे ॥ इत्युक्त्वांतर्हिते तस्मिन्रुरुः पश्चान्न वद्धरुः ॥ ८६ ॥ तदेतदुपमानाय तव देवि मयोदितं ॥ डुंडुभेषु प्रहरथ क्रुद्धा यूयमहिष्विति ॥ ८७ ॥ एवमभिधाय वचनं सनर्म हासं वसंतके ॥ विरते वासवदत्तां तां प्रति तुतोष पार्श्वस्थितापत्युः ॥ ८८ ॥ इति मृदुमधुराणि वत्सराजश्चरणगतः कुपितानुनाथनानि ॥ सततमुदयनश्चकार देव्या विविधवसंतककौशलेन कामी ॥ ८९ ॥ रसना मदिरामदैकसक्ता कलवीणारवरागिणी श्रुतिश्च ॥ दयितामुखनिश्चला च दृष्टिः सुखिनस्तस्य सदा बभूव राज्ञः ॥ ॥ ९० ॥ ॥ इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे कथामुखलंबके वासवदत्ताविवाहो नाम षष्ठस्तरंगः ॥ समाप्तश्चायं लंबकः ॥ २ ॥

63

[OrderDescription]
,CREATED=01.10.20 11:41
,TRANSFERRED=2020/10/01 at 11:49:02
,PAGES=63
,TYPE=STD
,NAME=S0003800
,Book Name=M-1605-KATHASARNSAGAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,